सामवेदीयकर्मविधानम्
Sāmavedīyakarmavidhānam

समावर्त्तनान्तम्
Samāvarttanāntam

श्रीनृसिंहमिश्रकृतम्
Of
Śrī Nṛsiṃhamiśra

By
Dr. Dillip Kumar Kar
Ācārya (M.A.), Viśiṣṭācārya (M.Phil.), Vidyāvāridhiḥ (Ph.D.)

सामवेदीयकर्मविधानम्
Sāmavedīyakarmavidhānam

समावर्त्तनान्तम्
Samāvarttanāntam

श्रीनृसिंहमिश्रकृतम्
Of
Śrī Nṛsiṃhamiśra

संपादकः
डा. दिलीपकुमारकरः
Edited By Dr. Dillip Kumar Kar
Ācārya (M.A.), Viśiṣṭācārya (M.Phil.), Vidyāvāridhiḥ (Ph.D.)

- समर्पणम् -

72/90, JC. 143706 P., Ex. Nb.Sub. Sri Bhagirathi Kar

जीवनस्य पदे पदेऽविरतप्रोत्सानप्रदातॄणां
मज्ज्येष्ठभ्रातॄणां भारतीयसैन्यविभागे कृतभूरिपरिश्रमाणां
दिवंगतानां भागीरथीकरशर्मणां
चरणकमलेषु पुष्पमिदं
सश्रद्धं समर्प्यते ।

***Sāmavedīyakarmavidhānam* (*Samāvarttanāntam*)** - *This book is edited from a palm-leaf manuscript written by Śrī Nṛsiṃha Miśra and transcripted by Śrī Dinabandhu Kar of Sanagorada of undivided Puri district (Now in Nayagarh district) of Orissa state somewhere in between last Decade of nineteenth century and the first half of the twentieth century. The manuscript is written in Sanskrit language and in Oriya script. This book describes the process how to perform the Sāmavedīyasaṃskāras upto Samāvarttanam. The second part of this manuscript is yet to be found out.*

First Edition : 2002
No of Copies - 500
Copy ritght : Editor
Price : 75/-

Publisher :-

Utkal Sanskrit Research Society,
Siddhamahavir, Puri - 2 (ORISSA)

Copy's Available at :

Dr. Dillip Kumar Kar
Junior Research Assistant
Academy of Sanskrit Research
MELKOTE - 571 431
Mandya District, (Karnataka)
Ph. NO. (O) 08236 - 298607

Printed at :

Chaaritra Printers
8th Cross, Ramanuja Road,
Mysore - 570 004 (Karnataka)

उपोद्घातः

पुस्तकस्यास्य प्रणेतृणां पण्डितश्रीनृसिंहमिश्राणां कालविषये जीवनीविषये च तथ्यं न कुत्राप्युपलभ्यते । मम पितृपितृव्यानां कथनानुसारं तेषां जन्म उत्कलप्रदेशस्याविभाजितपुरीमण्डलान्तर्गते यस्मिन् कस्मिन् ग्रामे एव स्यात् । पुस्तकस्यास्य पुनरुद्धारो मम पितामहेन दिवंगतेन पण्डितश्रीदीनबन्धुकरशर्मणा तालपत्रैः लिखित्वा कृतः येषां कालः १८८५ तः १९५३ क्रीस्ताब्दमध्ये आसीत् । अतः पण्डितश्रीनृसिंहमिश्राणां कालः तस्मात्पूर्वमेवासीदिति निःसन्देहम् ।

मातृकेयं २८.० x ३.८ से.मी. परिमिता, एकोनाशीतिपत्रविशिष्टा नवोत्तरसार्द्धैकशतपुटसंख्यका च वर्त्तते । अन्तिमपत्रं विहाय इतरेषां पत्राणामुभयपार्श्वे प्रतिपुटे पङ्क्तिचतुष्टयञ्च लिखितं वर्त्तते । जराग्रस्ता नष्टप्राया चेयं मातृका यथाकथञ्चिन्मम हस्ते आगता । अस्याः पुनरुद्धारोऽवश्यकरणीय इति विचिन्त्य मयेदानीं प्रकाश्यते । अस्यां मातृकायां सामवेदीयशाखान्तर्गतसंस्कारकर्मविधानं अन्ये कतिपये आशीर्वादात्मकश्लोकाः संस्कृतभाषयोत्कललिप्याञ्च लिखिताः वर्त्तन्ते । प्रथमतः सप्तत्रिंशदुत्तरैकशतपुटं यावदस्यां सामवेदीयशाखान्तर्गतसंस्कार-कर्मविधानं वर्त्तते । अस्या अपरभागे यस्यां विवाहादीतरसंस्कारकर्माणां वर्णनं वर्त्तते किन्तु सा नोपलब्धा मयेदानीं यावत् । तत्प्राप्त्यनन्तरं तच्च प्रकाशयितुं नितरां प्रयत्नः विधीयते ।

ग्रन्थेऽस्मिन् वर्तमानानां कतिचनानां श्लोकानां तथा साममन्त्राणामलभ्यमानत्वात्तेषां संशोधनं तथा पादटीकासंख्या च दातुं न शक्तः । तथाप्युत्तरोत्तरान्वेषणं विधीयते । तस्याः प्राप्त्यनन्तरं पुस्तकस्यास्य परवर्तिसंस्करणे तत्पष्क्रियते ।

संपादनकर्मण्यस्मिन् साग्रहेन वहुकष्टं स्वीकृत्य च त्रुटीः परिशोध्य ग्रन्थस्यास्य नूतनं कलेवरं दत्तं प्र. डा. व्रजकिशोरस्वाइँमहाभागैः मद्गुरुभिः । 'क्व चाल्पविषया मतिः' इति न्यायेन कार्यमिदं दुःसाध्यमासीन्मम कृते परन्तु संप्रति श्रीजगन्नाथ-संस्कृत-विश्वविद्यालयस्य धर्मशास्त्रविभागे प्राचार्यत्वेन कार्यरतानां एतेषां महाभागानां कार्यविधावस्मिन् साहचर्यं लब्ध्वाऽहं कृतकृत्योऽभवम् ।

विनीतः संपादकः
डा. दिलीपकुमारकरः ।

सूचीपत्रम्

क्र.सं	अध्यायः	विषयः	पुटसंख्या
1.	प्रथमोऽध्यायः	गर्भाधानकर्मविधानम्	1
2.	द्वितीयोऽध्यायः	पुंसवनकर्मविधानम्	6
3.	तृतीयोऽध्यायः	सीमन्तोन्नयनकर्मविधानम्	13
4.	चतुर्थोऽध्यायः	जातकर्मविधानम्	16
5.	पञ्चमोऽध्यायः	बहिर्निष्क्रमणकर्मविधानम्	20
6.	षष्ठोऽध्यायः	चन्द्रार्घ्यकर्मविधानम्	22
7.	सप्तमोऽध्यायः	नामकरणकर्मविधानम्	23
8.	अष्टमोऽध्यायः	अन्नप्राशनकर्मविधानम्	27
9.	नवमोऽध्यायः	चूडाकरणकर्मविधानम्	29
10.	दशमोऽध्यायः	उपनयनकर्मविधानम्	35
11.	एकादशोऽध्यायः	सावित्रचरुहोमकर्मविधानम्	44
12.	द्वादशोऽध्यायः	वेदारम्भकर्मविधानम्	48
13.	त्रयोदशोऽध्यायः	समावर्त्तनकर्मविधानम्	51

उपक्रमः

विदितमेव सर्वेषां विदुषां यत् भारतीयसंस्कृतेः पोषकतत्त्वेषु संस्कारस्यैव प्रमुखं स्थानम् । 'संस्क्रियतेऽनेन श्रौतेन स्मार्त्तेन कर्मणा पुरुषः' इति संस्कारः । अथवा 'संस्करणं सम्यक्करणं वा संस्कारः' । समुपसर्गात् 'कृञो' 'घञ्' प्रत्ययेन निष्पन्नोयं शब्दः । ते चाष्टचत्वारिंशद्गर्भाधानादारभ्य । स्मार्त्तसंस्कारास्तु षोडश एव प्रधानाः । ते च गर्भाधान-पुंसवन-सीमन्तोन्नयन-जातकर्म-नामकरण-निष्क्रमण-अन्नप्राशन-कर्णवेध-चूडाकर्म-उपनयन(विद्यारम्भस्यान्तर्भावः)-मौञ्जिबन्धन-गायत्री दीक्षा(वेदाध्ययन)-सावित्रीव्रत-समावर्त्तन-विवाह-अन्त्येष्टयाख्याश्च । परन्त्वस्मिन् किञ्चिन्मतवैभिन्नं परिलक्ष्यते । तद्यथा व्यासस्मृतौ -

गर्भाधानं पुंसवनं सीमन्तो जातकर्म च ।
नामक्रिया निष्क्रमोऽन्नप्राशनं वपनक्रिया ।।
कर्णवेधो व्रतादेशो वेदारम्भक्रियाविधिः ।
केशान्तःस्नानमुद्वाहो विवाहाग्निपरिग्रहः ।।
त्रेताग्निसंग्रहश्चेति संस्कारा षोडश स्मृता ।।

संस्कारशब्दोयं स्वयमेव स्वलक्षणमभिधत्ते । तद्यथा - आत्मशरीरान्यतरनिष्ठो हीनाङ्गपूरको दोषापमार्जनकरोऽतिशयाधायकश्च विहितक्रियाजन्योऽतिशयविशेष एव संस्कार इत्युच्यते । अनेन जातसन्तानेषु स्थिताः दोषाः दुर्गुणादयश्च परिहीयन्ते । यथा कांस्यादिभाजनानां मार्जनं विना तेषु मालिन्यमवलोक्यते तद्वत् संस्कारान् विना मनुष्येषु चाञ्चल्यं, बुद्धेर्मान्द्यत्वं, स्वास्थ्यहान्यादीनि मालिन्यान्यवलोक्यन्ते । संस्कारेण मानवीयप्रवृत्तीनां परिमार्जनं, परिष्करणं, संशोधनञ्च क्रियते । तद्यथा -

गार्भैर्होमैर्जातकर्मचौडमौञ्जिनिबन्धनैः ।
बैजिकं गार्भिकं चैनो द्विजानामपमृज्यते ।। (मनु.)

अर्थात् निषिद्धकाले कृतेन मैथुनेन रजोवीर्येषु दृष्टमशुचित्वं गार्भिकदोष इत्यभिधीयते । स एव सन्तानेषु सञ्चरितो भवेत् । स च गर्भाधान-जातकर्म-चूडाकर्मोपनयनादिभिः संस्कारैः तत्सम्बन्धीयहोमैश्च निराक्रियते । अनेन च जना आचारवन्तः भवन्ति । आचाराच्च धर्मानुरक्तत्वम् । 'आचारप्रभवो धर्म' इत्युक्तेः । सदाचारवत्सु जनेषु च लक्ष्मीर्निवसति । 'आचाराद्वर्द्धते लक्ष्मी' रित्युक्तेः । उच्यते -

जन्मना ब्राह्मणो ज्ञेयः संस्काराद्द्विज उच्यते ।
वेदाभ्यासाद्भवेद्विप्रस्त्रिभिः श्रोत्रिय उच्यते ।।

****

प्रथमोऽध्यायः

गर्भाधानकर्मविधानम्

Folio No. 1 - अथ गर्भाधानं लिख्यते । चतुर्थीकर्म - त्रिरात्रादूद्र्ध्वं वध्वाः सङ्गमं कुर्यात् । यदि वधू[1] प्रौढा भवति त्रिरात्रादूद्र्ध्वं संभवत्येन इति गोभिलगृह्यवचनात् । यदि वधू[2] सत्कालंभवेत्तदा पुष्पसंभवे गर्भाधानं कार्यम् । निषिद्धतिथिवारलग्नादिषु पुष्पदर्शनं भवति तदा न दोषगमनार्थं शान्तिं कुर्यात् । तथा च भुजबलसंहितायाम् । **निन्दिते भे यदि स्याच्छान्तिं कुर्यादज्ञानानां च पूर्वम् । तत्संयोगं वलभवर्जेयेयुर्यावद्भूयो दृश्यते शास्त्र-**

Folio No. 2 - मेतत् । होमं कुर्यात् गायत्र्या वारदोषे तथात्राऽपि ।। कुशैरष्टोत्तरशतं कुर्याद्दुर्वाभिरेव[3] च । तिलैराज्यैर्न दुर्वाभिः[4] होमं कुर्यात् शुभे दिने । नक्षत्रदोषशान्त्यर्थं प्रत्येकं च सहस्रकम् [5]।। इत्यादि वचनात् । नक्षत्रदोषेषु दुर्वातिलाज्यैः[6] प्रत्येकमष्टोत्तरसहस्रं जुहूयात्[7]। तिथ्यादिदोषेषु प्रतिदोषं दुर्वाकुशैः[8] प्रत्येकमष्टोत्तरशतं होतव्यम् । तत्र प्रयोगं[9] लिख्यते । पतिः शुभे दिने कृतनित्यक्रियः पूर्णकुम्भे गणपत्यादि -

---

१ - **वधूः** इति स्यात् ।

२ - **वधूः** इति स्यात् ।

३ - **कुर्याद्दूर्वाभिरेव** इति स्यात् ।

४ - **दूर्वाभिः** इति स्यात् ।

५ - भुजबलसंहिता

६ - **दूर्वातिलाज्यैः** इति स्यात् ।

७ - **जुहुयात्** इति स्यात् ।

८ - **दूर्वाकुशैः** इति स्यात् ।

९ - **प्रयोगो** इति स्यात् ।

Folio No. 3 - वरुणपूजां कुर्यात् । ततः स्वस्तिवाचनम् । विष्णुः कर्त्तव्येऽस्मिन् अमुकसगोत्रः श्रीमान् अमुकदेवशर्माहम् अमुकसगोत्रायाः मम भार्यायाः प्रथमरजोपदर्शनसमये वारादिसर्वदोषव्यपोहनार्थं कुशदुर्वा[1]तिलाज्यहोमकर्मणि स्वस्ति भवतो वृवतु । इति ब्राह्मणाः । **ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति न पूषा विश्ववेदाः । स्वस्ति नस्ताक्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु । स्वस्ति ३ ।।**[2] एवं कर्मऋद्धं भवतो वृवतु । ब्राह्मणाः । **ॐ ऋद्धा कर्मण्या अनपायिनो यथा सन् ।**

Folio No. 4 - जुहोमिहासुभगं सौभगाय पुरुत्तमं पुरुद्रुतश्रवसन् । कर्मऋद्धताम् ३ ।। एवं पुण्याह[3] भवतो वृवतु । ब्राह्मणाः । **ॐ पुनस्त्वादित्या रूद्रा वसवः समिन्धतां पुनर्ब्रह्माणो वसूनीथ यज्ञै । घृतेन त्वं तन्वं वर्द्धयस्व सत्याः सन्तु यजमानस्य कामाः स्वाहा ।।**[4] ततो पुण्याहवाचनम् । ततो विष्णुरित्यादि अमुकसगोत्रः श्रीमान् अमुकदेवशर्मा अमुकसगोत्रायाः मम भार्यायाः अमुकादेव्याः प्रथमरजोपदर्शनसमये वारादिसर्वदोषव्यपोहनार्थं कुश-

Folio No. 5 - दुर्वा[5]तिलाज्याहुतिभिः प्रत्येकं गायत्रीमन्त्रेण होमकर्माहं कुर्वीय । ततो वालुकया[6] हस्तपरिमितां चतुरङ्गुलोच्छ्रितां चतुरस्रां वेदीं कृत्वा गोमयेनोपलिप्य चन्द्रमसनामाग्निं संस्थाप्य । ब्रह्माणमुपवेश्य । आसादनम् । उदकम् । बह्नि[7] । इध्म । स्रुक् स्रुव । आज्यम् । समिद्द्वयम् । कुशाः । अक्षता । संमार्गकुशा[8] । दुर्वा[9]तिलानासाद्य । भूजप[10] । परिसमूहन[11] । परिस्तरण[12] । ईध्मदान[13] । पवित्रकरण[14] । आज्यसंस्कार[15] । स्रुक्स्रुवसम्मार्जन[16] । प्रतपन[17] । उदकाञ्जलिसेक[18] । पर्यु-

---

१ - **दूर्वा** इति स्यात् ।
२ - **ऋ.वे - १.८९.६, सा.वे. - १८७५, य.वे - २५.१९, तै.आ. - १.१.१, २१.३,१०.१.९**
३ - पुण्याहं **इति स्यात् ।**
४ - **य.वे - १२.४४**
५ - **दूर्वा इति स्यात् ।**
६ - **बोलुकया** इति स्यात् ।
७ - **बह्निः** इति स्यात् ।
८ - **संमार्गकुशाः** इति स्यात् ।
९ - **दूर्वा** इति स्यात् ।
१० - **भूजपनम्** इति स्यात् ।
११ - **परिसमूहनम्** इति स्यात् ।
१२ - **परिस्तरणम्** इति स्यात् ।
१३ - **ईध्मदानम् इति स्यात् ।**
१४ - **पवित्रकरणम्** इति स्यात् ।
१५ - **आज्यसंस्कारः** इति स्यात् ।
१६ - **स्रुक्स्रुवसम्मार्जनम्** इति स्यात् ।
१७ - **प्रतपनम्** इति स्यात् ।
१८ - **उदकाञ्जलिसेकः** इति स्यात् ।

Folio No. 6 - क्षणम् । विरुपाक्षजपः । समित्प्रक्षेपश्च । स्रुवेण स्रुचि चतुर्गृहित्वा[१] पञ्चावर्त्ति भृगुणा सुसमिद्धे चाग्नये स्वाहेत्युत्तरतो हुत्वा सोमाय स्वाहेति दक्षिणतो जुहूयात् । ॐकारस्य ब्रह्मा ऋषिः । गायत्री छन्दः । अग्निर्देवता । होमकर्मणि व्याहृतीनाम् । प्रजापति ऋषिः । जगति[२] छन्दः । सविता देवता । होमकर्मणि । ॐ गायत्र्या । विश्वामित्र[३] । सविता । होमकर्मणि । सप्रणवां सव्याहृतीं स्वाहाकारतां[४] पठित्वा दुर्वा[५]काण्डात्त्रयं प्रादेशमात्रं कुशद्वयं घृताक्तं सह-

Folio No. 7 - स्त्रं जुहूयात्[६] । एवं द्वादशपर्वपूरिताघृताक्ततिलाहुतिः । स्रुवपुरिता घृताहुतिः । एवं सहस्रचतुष्टयं हूत्वा[७] इदं सवित्रे इत्यागं[८] कुर्यात् । ततः स्रुचीस्रुवाणाहुतिद्वयं[९] गृहीत्वा अग्नये स्विष्टकृते स्वाहा । इदमग्नये स्विष्टकृते । ततः प्रायश्चितार्थं महाव्याहृतिचतसृभिः हूत्वा[१०] पुनः कर्त्ता तिसृभिर्हूत्वा[११] समिधं दत्वा पर्युक्ष्य । अदितेऽनुमङ्कस्थेति उदकाञ्जलिसेकं कृत्वा दर्भजुटिकाहोम[१२] वसोर्द्धारां च हूत्वा । अग्निं प्रदक्षिणीकृत्य ब्राह्मणभोजनं दत्वा हविश्शेषं पू-

Folio No. 8 - र्णपात्रदक्षिणाञ्च दत्वा उदकावशेषं निनीय पुनः पात्रमुदकेन पूरयित्वा वामदेव्यं गायेत् । अथ चन्द्रतारानुकुल[१३]दिवसे दैवज्ञोपदिष्टलग्ने अर्घ्यादिवरुणपूजां कृत्वा वध्वा सह नववस्त्रं परिधाय स्रग्गन्धादियुक्तो दूर्वावदराक्षतादिभिः सधवास्त्रीभिः वन्दापनां कारयित्वा ब्राह्मणैराशीर्वादं कारयेत् । ततो यथासम्भवं पूर्वोक्तसंकल्पेन गर्भाधानाङ्गतया मातृपूजावसोर्द्धारा । आभ्युदयिकं श्राद्धं कुर्यात् । तथा च भविष्ये **निशेककाले[१४] सोमे च सीमन्तोन्नयने तथा ।**[१५]

---

१ - **गृहीत्वा** इति स्यात् ।
२ - **जगती** इति स्यात् ।
३ - **विश्वामित्रः** इति स्यात् ।
४ - **स्वाहाकारन्तां** इति स्यात् ।
५ - **दूर्वा** इति स्यात् ।
६ - **जुहुयात्** इति स्यात् ।
७ - **हुत्वा** इति स्यात् ।
८ - **हुत्यागं** इति स्यात् ।
९ - **स्रुचिस्रुवेणाहुतिद्वयं** इति स्यात् ।
१० - **हुत्वा इति स्यात् ।**
११ - **तिसृभिर्हुत्वा** इति स्यात् ।
१२ - **दर्भजुटिकाहोमं** इति स्यात् ।
१३ - **चन्द्रतारानुकूल** इति स्यात् ।
१४ - **निषेककाले** इति स्यात् ।
१५ - भविष्यपुराणम्

Folio No. 9 - ज्ञेयं पुंसवने चैव श्राद्धकर्माङ्गमेव च ।। अत्र समाचारात् नारिकेलफले पूर्णाहूतिहोमः[१] कार्यः । **ॐ अग्निमूर्द्धे**[२]ति मन्त्रस्य । भरद्वाज ऋषिः । वैश्वानरो देवता । पूर्णाहूतिहोमे[३] विनियोगः । **ॐ पूर्णादर्वी**[४]ति मन्त्रस्य । प्रजापति ऋषिः । अनुष्टुप् छन्दः । इन्द्रो देवता । पूर्णाहूतिहोमे[५] विनियोगः । **ॐ मूर्द्धानं दिवो अरतिं पृथिव्या वैश्वानरसूत अजातमग्निम् । कविः सम्राजमतिथिं जनानामासन्ना पात्रं जनयद्देवा ।।**[६] **ॐ पूर्णादर्वी पराप-**

Folio No. 10 - त सुपर्णा पुनरापत । वस्नेव विक्रिणावहा ईषमूर्ज शतक्रतो ।।[७] **मानः शँ सो उररुषो धूर्तिः प्रणङ्मर्त्यस्य । रक्षाणो ब्रह्मणस्पते ।।**[८] **ॐ पुनस्त्वादित्या रूद्रा वसवः समिन्धतां पुनर्ब्रह्माणो वसूनीथ यज्ञै । घृतेन त्वं तन्वं वर्द्धयस्व सत्याः सन्तु यजमानस्य कामाः स्वाहा ।।**[९] वौषट् । इदमग्नये । वैश्वानराय । अथ सायं सन्ध्यामतीतायां[१०] स्रग्गन्धालंकृतः पूर्वाभिमुख[११] प्रत्यङ्मुखोपविष्ठाया वध्वा योनिदेशं दक्षिणहस्तेन स्पृशेत् । **ॐ विष्णुयोनिमि**[१२]त्यस्य ।

---

१ - **पूर्णाहुतिहोमः** इति स्यात् ।

२ - ॐ अग्नि मुर्द्धा दिवः ककुत् पतिः पृथिव्या अयम् । अपां रेतांसि जिन्वति ।।
ऋ.वे. - ८.४४.१६, सा.वे. - २७, १५३२, वा.य. - ३.१२, १३.१४,१५.२०, तै.सं. - १.५.५.१, ४.४.१.१, तै.ब्रा. - ३.५.७.१

३ - **पूर्णाहुतिहोमे** इति स्यात् ।

४ - पूर्णा दर्वि परा पत सुपूर्णा पुन । पत । वस्नेव विक्रीणावहा ईषमूर्जं शतक्रतो ।।
वा.सं. - ३.४९

५ - **पूर्णाहुतिहोमे** इति स्यात् ।

६ -

७ - वा.सं. - ३.४९

८ - य.वे. - ३.३०

९ - य.वे. - १२.४४

१० - **सन्ध्यायामतीतायां** इति स्यात् ।

११ - **पूर्वाभिमुखः** इति स्यात् ।

१२ - ॐ विष्णुयोनिं कल्पयतु त्वष्टा रूपाणि पिंशतु । आ सिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते ।।
ऋ.वे. - १०.१८४.१, अ.वे. - ५.२५.५, श.ब्रा. - १४.९.४.२०

Folio No. 11 - प्रजापति ऋषिः । अनुष्टुप् छन्दः । विष्णुत्वष्टृप्रजापतिधातारो देवता[१] । गर्भाधान उपस्थस्पर्शने विनियोगः । **ॐ विष्णुयोनिं कल्पयतु त्वष्टा रूपाणि पिंशतु । आ सिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते ।।**[२] **ॐ गर्भं धेही**[३]त्यस्य । प्रजा । अनु । सिनिवालि सरस्वत्यश्विनौ देवता । गर्भाधान उपस्थस्पर्शने विनियोगः । **ॐ गर्भं धेही सिनिवालि गर्भं धेही सरस्वती । गर्भं ते अश्विनौ देवा वाधत्तं पुष्करस्रजौ ।।**[४]

Folio No. 12 - इति पठित्वा गर्भं स्पृशेत् । इति गर्भाधानकर्म समाप्तम् ।

---

१ - **देवताः** इति स्यात् ।

२ - ऋ.वे. - १०.१८४.१, अ.वे. - ५.२५.५, श.ब्रा. - १४.९.४.२०

३ - **सा.म.ब्रा. - १.४.७,** ऋ.वे. **- १०.१८४.२, अ.वे. - ५.२५.३,** श.ब्रा. **- १४.९.४.२०**

४ - **सा.म.ब्रा. - १.४.७,** ऋ.वे. **- १०.१८४.२, अ.वे. - ५.२५.३,** श.ब्रा. **- १४.९.४.२०**

द्वितीयोऽध्यायः
पुंसवनकर्मविधानम्

Folio No. 12 - अथ पुंसवनकर्मोच्यते । स्वकाले चेत्पुंसवनं न कृतं तदाक्षिप्तहोमन्यायेन सर्वप्रायश्चित[1] हूत्वा[2] पुंसवनद्वयं कृत्वा सीमन्तकरणमारभेत् । अत्र सर्वप्रायश्चित[3]होमप्रयोगो लिख्यते । आदौ वरुणपूजा । संकल्पः । अमुकसगोत्रः श्रीमान् अमुकदेवशर्मा अमुकसगोत्रायाः मम भार्यायाः अमुकदेव्याः पुंसवनकर्मणः कालातिक्रमदोष-व्यपोहनार्थमनादेशप्रायश्चित[4]-होमकर्माहं -

Folio No. 13 - कुर्वीय । पुण्याहवाचनम् । पुंसवनकर्मणो मुख्यकाला-तिक्रमदोषव्यपोहनार्थमनादेशप्रायश्चित[5]होमकर्मारम्भः क्रियते यदेत्यादि । गृहमध्ये शुचौ देशे स्थण्डिलं कृत्वा पञ्चभूसंस्कारं कृत्वा ज्वलदिन्धनवह्निपात्रं गृहीत्वा । ॐ महाव्याहृतीनाम् । प्र (प्रजापति ऋषिः)। वृ (वृहती छन्दः)। अग्नि (अग्निर्देवता)। अग्निस्थापने विनियोगः । ॐ भूर्भुवस्स्वः चन्द्रमसिनामाग्ने अत्रागच्छ । इति रेखोपरि आत्माभिमुख[6] अग्निं प्रणीय इन्धनादिभिः प्रज्वालयेत् । नात्र ब्रह्मा । पात्रा-

---

१ - **सर्वप्रायश्चित्तं** इति स्यात् ।

२ - **हुत्वा** इति स्यात् ।

३ - **सर्वप्रायश्चित्त** इति स्यात् ।

४ - **प्रायश्चित्त** इति स्यात् ।

५ - **प्रायश्चित्त** इति स्यात् ।

६ - **आत्माभिमुखम्** इति स्यात् ।

Folio No. 14 - सादनम् । उदकम् । आज्यस्थाली । कुशाः । स्रुव[1] स्रुक् । आज्यम् । समिद्द्वयम् । अक्षता इत्यासाद्य । **इदं भूमेरिति** भूजपं कृत्वा तुष्णिमग्नवत्[2] बालकीं कृत्वा ज्वालयेत् । पवित्रच्छेदनादि आज्यसंस्कारं तं कृत्वाग्नेः पश्चात्संस्थाप्य स्रुवसम्मार्गकुशैः समृज्य प्रतप्य स्थाप्य[3] उदकाञ्जलिसेकं पर्युक्षणं कृत्वाग्नौ समिधं दत्वा होमं कुर्यात् । **स्रुवा जुहूयादि**[4]ति वचनात् । स्रुवेण स्रुचि च चतुराज्याहुतिं गृहीत्वा । ॐ प्रजा (प्रजापति ऋषिः)। गाय (गायत्री छन्दः)। अग्नि (अग्निर्देवता)। प्रायश्चित[5]होमे विनियोगः । ॐ भूः स्वाहा । इदमग्नये । ॐ प्रजा (प्रजापति ऋषिः)।

Folio No. 15 - ऊष्णि (ऊष्णिक् छन्दः)। वायु (वायुर्देवता)। प्रायश्चित (प्रायश्चित्तहोमे विनियोगः)। ॐ प्रजा (प्रजापति ऋषिः)। अनु (अनुष्ठुप् छन्दः)। सूर्यो (सूर्यो देवता)। प्रयश्चित[6] (प्रायश्चित्तहोमे विनियोगः)। ॐ स्वः स्वाहा । इदं सूर्याय । ॐ प्रजा (प्रजापति ऋषिः)। वृ (वृहती छन्दः)। सर्वप्रायश्चितहोमे विनियोगः । ॐ भूर्भुवस्स्वः स्वाहा । इदं प्रजापतये । इत्याहुतिचतुष्टयं हूत्वाग्नौ[7] समिधं दत्वा पूर्ववत्पर्युक्ष्य उदकाञ्जलिना प्रदक्षिणीकृत्य जलशेषं निनीय पुनः पात्रमुदकेन पूरयित्वा कीलालमुपसृत्य वामदेव्यं गायत् । कायासाग्नः । वामदेव[8] ऋषिः । त्रिष्ठुप् छन्दः ।

Folio No. 16 - इन्द्रो देवता । शान्त्यर्थे विनियोगः । **काया ट्यमिनश्चा तत्रा आभूं वातपो के ति सदा वृधः सगोखाक औ हो होइचे । काया श गइक । ष्टयौ हो टीहुमा कादार्भोट् होइखिमि** । सर्वप्रायश्चितं[9] तु परिशिष्टेनोक्तम् । संस्कारश्चेद्विपदेरन् स्वकालाश्चेत्कथञ्चन । इत्यैतदेवकर्त्तव्या ये तूपनयनादधः । उपनयनं तु ब्रात्यस्तेक्षं गुरुतरं प्रायश्चितं[10] कर्त्तव्यम् । गर्भस्य तृतीयमासस्यादौ शुभेऽहनि प्रात-

१ - **स्रुवः** इति स्यात् ।
२ - **तूष्णिमग्नवत्** इति स्यात् ।
३ - **संस्थाप्य** इति स्यात् ।
४ - **जुहुयादिति** इति स्यात् ।
५ - **प्रायश्चित्त** इति स्यात् ।
६ - **प्रायश्चित्त** इति स्यात् ।
७ - **हुत्वाग्नौ** इति स्यात् ।
८ - **वामदेवः** इति स्यात् ।
९ - **प्रायश्चित्तं** इति स्यात् ।
१० - **प्रायश्चित्तं** इति स्यात् ।

Folio No. 17 - रेव कृतनित्यक्रियः पतिर्गृहमध्ये वरुणपूजां कृत्वा संकल्पं कुर्यात् । अमुकसगोत्रः श्रीमानमुकदेवशर्मा अमुकसगोत्रायाः मम भार्यायाः अमुकदेव्याः पुंसवनकर्माहं कुर्वीय । मातृपूजा । वसोर्द्धारा । आभ्युदयिकं श्राद्धम् । अथ पञ्चभूसंस्कार-पूर्वक**चन्द्रमसनामाग्नेऽत्रागच्छे**तिरेखोपर्यात्माभिमुखं स्थापयेत् । ततो[1] पत्नी अहते वाससि[2] परिधायाग्नेः पश्चिमदेशे उदगग्रेषु कुशेषु प्राङ्मुखोप-

Folio No. 18 - विशेत् । तद्दक्षिणतः पतिः । ब्रह्मावरणम्[3] । अमुकसगोत्रायाः मम भार्यायाः अमुकदेव्याः पुसवनकर्माङ्गहोमकर्मणि कृताकृतावेक्षकत्वेन ब्रह्माणं त्वामहं वृणे । इति स्वोत्तरतोपविष्टं ब्रह्माणं वृणुयात् । ब्रह्मा वृतोऽस्मि इत्युक्त्वाग्नेरुत्तरतः प्रभृति दक्षिणावर्त्तेन दक्षिणं गत्वारत्निमात्रां तरितामग्निदेशे प्राङ्मुखीं वारिधारां दत्त्वा तदुत्तर प्रागग्रान् कुशानास्तीर्य पश्चिमाभिमुखोऽनुपविष्टो वामहस्तानामिकाङ्गुष्ठाभ्यामा-

Folio No. 19 - स्तीर्णकुशानामेकं गृहीत्वा । ॐ प्र (प्रजापति ऋषिः) । य (यवमध्या छन्दः) । अग्नि (अग्निर्देवता) । तृणनिरसने (तृणनिरसने विनियोगः) । **निरस्तपरावसु**रित्यनेन नैर्ऋत्यां दिशि निक्षिपेत् । ततः अप उपसृश्य[4] उत्तराभिमुख आस्तृतकुशानाभ्युक्ष[5] । प्र (प्रजापति ऋषिः) । य (यवमध्या छन्दः) । अग्नि (अग्निर्देवता) । उपवेशने (उपवेशने विनियोगः) । आवसोः सदने सीदामीत्युपविशेत् । अथ पात्रासादनम् । उदकं परिस्तरणार्थं वर्हि[6] । विंशतिप्रमाणानीध्मानि । स्रुव । आज्यम् । समिद्द्वयम् । कुशाः । अक्षता । पूर्णपात्र[7] । सम्मार्गकुशांश्चासादयेत् । ततः -

---

१ - **ततः** इति स्यात् ।

२ - **वाससी** इति स्यात् ।

३ - **ब्रह्मवरणम्** इति स्यात् ।

४ - **उपस्पृश्य** इति स्यात् ।

५ - **कुशानाभ्युक्ष्य** इति स्यात् ।

६ - **बर्हिः** इति स्यात् ।

७ - **पूर्णपात्रम्** इति स्यात् ।

Folio No. 20 - परमेष्ठी ऋषिः । अनुष्टुप् छन्दः । भूमि[1] (भूमिर्देवता)। भूजपे (भूजपे विनियोगः)। **इदं भूमेरि**ति भूजपं कृत्वा । कौत्स ऋषिः । जगति (जगती छन्दः)। अग्नि (अग्निर्देवता)। परिसमूहने विनियोगः । **इमं स्तोममर्हते**[2]ति अग्न्यवयवानेकीकृत्य ज्वालयेत् । ततो अग्नेश्चतसृ[3]दिक्षु कुशानास्तीर्य विंशतिप्रमाणानीध्मानि दत्वा पूर्ववत् ऋष्यादिकं स्मृत्वा पवित्रं छित्वाभ्युक्ष्याज्यस्थाली[4] संस्थाप्य तत्र होमार्थं घृतं निक्षिप्य ताभ्यामुत्पुयाभिरभ्युक्षाग्नौ[5] प्रक्षिप्य आज्यस्थालीमधिश्रित्योदगुद्वास्य पश्चादास्तृतवर्हिषि स्थाप-

Folio No. 21 - येत् । स्रुवसम्मार्गकुशैः समृज्य प्रतप्य दक्षिणजानु-निपात्यादितेऽनुमन्वस्वेत्यादिभिः । उदकाञ्जलिसेकं कृत्वा । पर्युक्ष **देवसवितरी**ति प्रादक्षिणेन पर्युक्ष सौषधिसमित्कुशकरः कृताञ्जलिः । परमेष्ठी ऋषिः । यजु[6] (याजुषी छन्दः)। रूद्ररिपोऽग्निदेवता[7] । प्रपदविरुपाक्षजपे विनियोगः । धृतनिश्वासः । **ॐ तपश्च तेजश्च** इत्यादि ब्रह्मणः पुत्राय नम इत्यन्तं पठित्वा ब्रह्मणः शिरस्यक्षतं दत्वाग्नौ समिधं प्रक्षिप्य कुशानैशयन्यां दिशि -

Folio No. 22 - निक्षिपेत् । ऋष्यादिकं कृत्वा । ॐ भूः स्वाहा । ॐ भुवः स्वाहा । ॐ स्वः स्वाहा । इति तिर्सृभिर्हूत्वा[8] पुण्याहवाचनं कृत्वा पुंसवनकर्मारम्भः क्रियते यदेत्यादि । ततः पतिरुत्थाय वधुपृष्ठदेशस्थितो वधुदक्षिणस्कन्धं स्पृष्ट्वा अधोगतेन हस्तेनाव्यवहितं नाभिदेशं स्पृशन् । ॐ प्र (प्रजापति ऋषिः)। अनु (अनुष्टुप् छन्दः)। मित्रावरुणाग्निवायवो देवता । पूर्वपुंसवने विनियोगः । **ॐ पुमांसौ मित्रावरुणौ पुमांसावश्विनावुभौ । पुमानग्निश्च वायुश्च । पुमान् गर्भ-**

---

१ - भूमिः इति स्यात् ।

२ - **इमं स्तोममर्हते जातवेदसे रथमिव सं महेमा मनीषया ।**
भद्रा हि नः प्रमतिरस्य संसद्यग्ने सख्ये मा रिषामा वयं तव ।। अ.वे. - २०.१३.३

३ - **अग्नेश्चतसृषु** इति स्यात् ।

४ - **आज्यस्थालीं** इति स्यात् ।

५ - **ताभ्यामुत्पूयाभिरभ्युक्ष्याग्नौ** इति स्यात् ।

६ - याजु इति स्यात् ।

७ - **अग्निर्दोवता** इति स्यात् ।

८ - **हुत्वा** इति स्यात् ।

Folio No. 23 - स्तवोदरे ।।[१] इमं मन्त्रं पठेत् । ब्रह्माचतसृभिर्महाव्याहृतिभिर्हूत्वा पतिः पृष्ठदिशादागत्य पुनस्तिसृभिर्हूत्वाग्नौ समिधं दत्वा पूर्ववत् पर्युक्ष्य अदितेऽनु-मङ्कस्थेति उदकाञ्जलिसेकं कृत्वा उत्तानहस्ताभ्यां कतिपयास्तरणकुशान् गृहीत्वा । प्र (प्रजापति ऋषिः)। य (यवमध्या छन्दः)। वायु[२] (वायुर्देवता)। दर्भतृणाभ्यञ्जने विनियोगः । **ॐ अक्तं रिहाणाव्यतुवयः** ।[३] अनेन वारत्रयपठितेनाग्रमूलमध्यानाज्येनाभ्युक्ष्य तान् दर्भानभिरभ्युक्ष्य । प्र (प्रजापति ऋषिः)। अनु (अनुष्टुप् छन्दः)। रूद्रो (रुद्रो देवता)।

Folio No. 24 - दर्भजुटिकाहोमे विनियोगः । **ॐ यः पशूनामधिपतिरूद्रस्तं तितरोवृष्य । पशुनस्माकं माहिंसिरेतदस्तुतं तव स्वाहा** । इदं रूद्राय । प्र (प्रजापति ऋषिः)। य (यवमध्या छन्दः)। वसवो (वसवो देवता)। वसोर्द्धाराहोमे विनियोगः । ॐ वसूभ्यः[४] स्वाहा । इदं वसूभ्यः[५] । ततोऽग्नि[६] प्रदक्षिणीकृत्य जलशेषं निनीय पुनः पात्रमुदकेन पूरयित्वा वामदेव्यं गायेत् । दशपरिमितब्राह्मणभोजनम् । ब्रह्माग्निविसर्जनम् । विष्णुस्मरणपूर्वकमछिद्रावधारणम्[७] । आशीर्वादश्च । इति पूर्वपुंसवनम् ।

Folio No. 25 - अथोत्तरपुंसवनम् लिख्यते । वरुणपूजा । संकल्पः । कालातिक्रमे पूर्ववत् सर्वप्रायश्चित[८]होमः । मातृपूजा । वसोर्द्धारा । आभ्युदयिकश्राद्धम् । पूर्वपुंसवनात्परस्मिन्नहनि पतिः बटवृक्षस्यैशान्यां दिशि गत्वा एकविंशतियवान् मासानि[९] त्रिकं कृत्वा सप्तधा बटमूले निक्षिप्य त्रिभिस्त्रीभिर्गुडकै[१०] सप्तवारास्सप्तभिर्मन्त्रैः बटपर्णनवाङ्कुरमुभयतः पर्णयुगलधृतं वृन्तमूलं कृमवर्ज्यं[११] परिक्रिणीयात् । परिक्रयणमन्त्रस्य। प्रजापतिऋषिः । यजुः -

---

१ -

२ - **वायुः** इति स्यात् ।

३ -

४ - **वसुभ्यः** इति स्यात् ।

५ - **वसुभ्यः** इति स्यात् ।

६ - **अग्निं** इति स्यात् ।।

७ - **अच्छिद्रावधारणम्** इति स्यात् ।

८ - **प्रायशचित्त** इति स्यात् ।

९ - **'मासानि'** इति पदं नान्वितमत्र ।

१० - **त्रिभिस्त्रिभिर्गुडकैः** इति स्यात् ।

११ - **कृमिवर्ज्यं** इति स्यात् ।

Folio No. 26 - सोमवरुणवसुरूद्रादित्यमरुद्विश्वेदेवा देवता । **ॐ यद्दसि सौमीसोमाय त्वाराज्ञे परिक्रिणामि । यद्दसि वारुणीवरुणाय त्वाराज्ञे परिक्रिणामि । यद्दसि वसुभ्यो वसुत्भ्यत्स्वाराज्ञे परिक्रिणामि । यद्दसि रूद्रेभ्यो रूद्रेत्भ्यस्वराज्ञे परिक्रिणामि । यद्दसादित्येभ्यो अदितेत्भ्य स्वाराज्ञे परिक्रिणामि । यद्दसि मरुद्भ्यो मरुद्भ्यस्वराज्ञे परिक्रिणामि । यद्दसि विश्वेभ्यो देवेभ्यो विश्वेभ्यो देवेभ्य -**

Folio No. 27 - स्वाराज्ञे परिक्रिणामि ।[१] इति क्रित्वा गृहं प्रविश्य । ॐ प्र (प्रजापति ऋषिः)। य (यवमध्या छन्दः)। यज्ञे[२] (यज्ञो देवता)। न्यग्रोधशृङ्गोपस्थापने विनियोगः । **ॐ औषधयः सुमनसो भूहास्यम् । वीर्यं समाधत्तेयं कर्म करिष्यति ।** वटशाखामुभयतः फलयुक्तां कृमिवर्जितां हरिद्वर्णामित्युत्पाट्य गृहित्वा[३] तृणेन वेष्टयित्वा गृहमानीयाकाशे स्थूणादौ निदधात्[४]। पत्न्याः स्नानम् । लक्षणपूर्वाग्निप्रणयनम् । अग्नेः पश्चात्सपत्निकस्य[५] पत्युरुपवेशनम् । ब्रह्मोपवेशनम् । पात्रासादनम् । भूजप[६] । परिसमूहनम् ।

Folio No. 28 - परिस्तरणम् । इध्मदानम् । पवित्रकरण । पवित्रमार्जनम् । आज्यसंस्कारः । स्त्रुवसम्मार्जन[७] । प्रतपन[८]। उदकाञ्जलिसेक[९] । पर्युक्षणम् । विरुपाक्षजपं कृत्वा अग्नौ समिधं प्रक्षिपेत् । ततो अग्नेरुत्तरतो दृषदुत्पलाभ्यां पूर्वानित[१०]न्यग्रोधशृङ्गा-कुशमूलकमेकविंशतियवसहितां गर्भिणी काचित्कुमारी शिलापुत्रकमनावर्त्तयत्त पुनः सप्तवारान् प्रेषयति[११] । ततः सोम्यांशुतुषारमेकीकृत्य महाव्याहृतिभिराज्येनाहूतित्रयं[१२] हूत्वा । पुण्याहमित्यादि उत्तरपुंस-

१ -
२ - **यज्ञो** इति स्यात् ।
३ - **गृहीत्वा** इति स्यात् ।
४ - **निदध्यात्** इति स्यात् ।
५ - **पश्चात्सपत्नीकस्य** इति स्यात् ।
६ - **भूजपः** इति स्यात् ।
७ - **स्त्रुवसम्मार्जनम्** इति स्यात् ।
८ - **प्रतपनम्** इति स्यात् ।
९ - **उदकाञ्जलिसेकः** इति स्यात् ।
१० - **पूर्वानीत** इति स्यात् ।
११ - **पेषयति** इति स्यात् ।
१२ - **महाव्याहृतिभिराज्येनाहुतित्रयं** इति स्यात् ।

Folio No. 29 - वनकर्मारम्भः क्रियते यदेत्यादि । ततोऽग्नेः पश्चादुदगग्रकुशविष्टरे प्राच्यां शिरः कृत्वा शयितायाः पत्न्याः अग्नेः पश्चात्तरा[१] पतिः प्रत्यङ्मुखोपविश्य दक्षिणहस्तानामिकाङ्गुष्ठाभ्यां पिष्टं वस्त्रवद्धां शृङ्गा[२] गृहीत्वा पत्न्या दक्षिणनासापुटे निक्षिपेत् । ॐ प्र (प्रजापति ऋषिः)। अनु (अनुष्टुप् छन्दः)। अग्निरिन्द्रबृहस्पतयो[३] देवता । न्यग्रोधशृङ्गरसक्षेपे विनियोगः । **ॐ पुमानग्निः पुमानिन्द्रः पुमान् देवो बृहस्पतिः । पुमांसं पुत्रं विन्दस्व तं पुमाननुजायताम् । यथा गर्भे प्रविशति ।।**[४]

Folio No. 30 - ततः पत्निमुत्थापयेत्[५]। ब्रह्मा चतसृभिः हूत्वा[६] । पुनः कर्त्ता तिसृभिः हूत्वाग्नौ[७] समिधं दत्वा पर्युक्ष्य उदकाञ्जलिं कुशमुष्टिं वसोर्द्धारां च हूत्वा[८] । ब्राह्मणभोजन हविश्शेषपूर्णपात्रदक्षिणां च दत्वा वामदेवं गीत्वाछिद्रावधार्याशीर्वादं कारयेत् । दैवान्मानुषाद्वाक्षदेते कर्मणि न कृते तदाक्षिप्रहोमन्यायेन प्रायश्चितं हूत्वैते[९] कर्मणि कृत्वा सीमन्तकरणमारभेत् । एतयोः पृथगग्निप्रणयनादिवामदेव्यगानान्तं पृथगाभ्युदयि-

Folio No. 31 - कं च शास्त्रार्थः । लोकायेकमेव[१०] श्राद्धं कृत्वाग्निप्रणीय[११] प्रायश्चितं[१२] कृत्वा ब्रह्मोपवेशनादि व्याहृतिहोमान्तं सकृत्कृत्वांशाभिमर्षणापूर्वकनाभ्यां लभ्यरूपपुंसवनं कृत्वा शृङ्गपेषणादिनासापुटसनिक्षेपरूपमुत्तरपुंसवनं कृत्वा व्याहृतिहोमादि वामदेव्यं[१३] गानान्तं तत्समापयति । तत्र शिष्ट एव प्रमाणमिति त्रिविक्रमेणोक्तम् । इत्युत्तरपुंसवनम् ।

---

१ - **पश्चात्तरः** इति स्यात् ।
२ - **शृङ्गां** इति स्यात् ।
३ - **अग्निरिन्द्रबृहस्पतयः** इति स्यात् ।
४ -
५ - **पत्नीमुत्थापयेत्** इति स्यात् ।
६ - **हुत्वा** इति स्यात् ।
७ - **हुत्वाग्नौ** इति स्यात् ।
८ - **हुत्वा** इति स्यात् ।
९ - **हुत्वैते** इति स्यात् ।
१० - **लोकायैकमेव** इति स्यात् ।
११ - **कृत्वाग्निं प्रणीय** इति स्यात् ।
१२ - **प्रायश्चित्तं** इति स्यात् ।
१३ - **वामदेव्य** इति स्यात् ।

तृतीयोऽध्यायः
सीमन्तोन्नयनकर्मविधानम्

Folio No. 31 - अथ सीमन्तोन्नयनं लिख्यते । प्रथमगर्भे षष्ठ[१]ऽष्टमे -

Folio No. 32 - मासि वा यत्र पूर्वपक्षोदगयनादिसम्भवस्तत्र सीमन्तकरणम् । पूर्वदिवसे गणपत्यादिवरुणपूजा बहिश्शालारोपणम् । कालातिक्रमेण[२] पूर्ववत्प्रायश्चित[३]होमः । वध्वाः स्नानम् । वरुणपूजा संकल्पः । मम भार्यायाः अमुकदेव्याः सीमन्तो-नयन्नकर्माहं कुर्वीय । मातृपूजा । वसोर्द्धारा । आभ्युदयिकश्राद्धम् । ततः पञ्चभूसंस्कारं कृत्वा मङ्गलनामाग्निं संस्थाप्य ब्रह्माणमुपवेश्य । पात्रासादनम् । उदकम् । वर्हि[४] । इध्म । स्रुव[५] । आज्यम् । समिद्द्वयम् । सम्मार्गकुशाः । प्रणिता[६] पू-

Folio No. 33 - र्णपात्रम् । स्थाली । तण्डुल । तिल । यव । पवित्रोदकम् । मेक्षणम्। स्रुवयुग्मौ । औदुम्बरः । तिस्रो दर्भिपिञ्जल्यः । शर । सूत्रम् । तर्करि । त्रिः श्वेताशलली । इत्यासाद्य । तिलतण्डुलान् द्विः प्रक्षाल्य । पवित्रान्तर्हितस्थाल्यां प्रक्षिप्य मेक्षणेन कृशरं प्रणित[७] एवाग्नौ श्रपयित्वा घृतेनाभिघा-र्योद्वासयित्वा प्रत्यभिघार्य भूजप[८] । परिसमूहनम् । परिस्तरणम् । इध्मदानम् । पवित्रकरणम् । आज्यसंस्कारः स्रुवसम्मार्जनम् । प्रतपनम् । उदकाञ्जलिसेकः । पर्युक्षणम् । विरुपाक्षजपः ।

---

१ - **षष्ठे** इति स्यात् ।

२ - **कालातिक्रमणे** इति स्यात् ।

३ - **प्रायश्चित्त** इति स्यात् ।

४ - **बर्हिः** इति स्यात् ।

५ - **स्रुवः** इति स्यात् ।

६ - **प्रणीता** इति स्यात् ।

७ - **प्रणीत** इति स्यात् ।

८ - **भूजपः** इति स्यात् ।

Folio No. 34 - समित्प्रक्षेपश्च । व्याहृतिभिर्हूत्वा पुण्याहवाचनं कुर्यात् । मम भार्यायाः अमुकदेव्याः सीमन्तोनयनकर्मारम्भः क्रियते यदेत्यादि । यतोऽग्नेः पश्चादुदगग्रकुशेषु प्राङ्मुखीं पत्निमुपवेश्य[1] स्वयं पश्चात्प्राङ्मुखः पतिः उपवेश्य औदुम्बरस्तवकमेवृत्तं[2] लग्नस्थितोदुम्बरफलयुगलं हरिद्राक्तसूत्रवद्धं पत्न्या गले वध्नीयात् । ॐ प्र (प्रजापति ऋषिः)। अनु (अनुष्ठुप् छन्दः)। स्त्रीदेवता । उदुन्बरफलयुगलबन्धने विनियोगः । **ॐ अयमूर्जावतो वृक्ष ऊर्जीवफलिनि भव ।**

Folio No. 35 - पर्णवनस्पतेऽनुहानुहासूयतां रयि ।। इति मन्त्रेण बध्नाति । ततो दर्भपिञ्जलित्रयं गृहीत्वा । प्र (प्रजापति ऋषिः)। गायत्री (गायत्री छन्दः)। अग्निः (अग्निर्देवता)। सीमन्तोन्नयने विनियोगः । ॐ भूः । इत्यनेन मन्त्रेण दर्भपिञ्जलिबधुकेशसादरभ्य[3] सीमन्तमूर्द्धानं नीत्वा तास्तत्रैव स्थापयेत् । अपरं दर्भपिञ्जलित्रयं गृहीत्वा । प्रजा । ऊष्णिक् । वायु । सीमन्तोनयने । ॐ भुवः । इति द्वितीयम् । पुयरपि[4]दर्भपिञ्जलित्रयं गृहीत्वा । प्र (प्रजापति ऋषिः)। अनु (अनुष्ठुप् छन्दः)। सूर्यो (सूर्यो देवता)। सीमन्तोन्नयने (सीमन्तोन्नयने विनियोगः)। ॐ स्वः । अनेन तृतीयम् । ततः शरं -

Folio No. 36 - गृहीत्वा । प्र (प्रजापति ऋषिः)। त्रिष्ठुप् (त्रिष्ठुप् छन्दः)। स्त्रीदेवता । शरेण सीमन्तोन्नयने विनियोगः । **ॐ येनादिते सीमानं नयति प्रजापतिर्महते सौभगाय । तेनाहमस्यै सीमानं नयामि प्रजामस्यै जरदष्टिं कृणोमि ।।** अनेशर । सूत्रपूर्णतर्करिं गृहीत्वा । प्रजा (प्रजापति ऋषिः)। जगति[5] (जगती छन्दः)। राका (राका देवता)। सीमन्तोन्नयने विनियोगः । **ॐ राकामहं सुहवा सुष्ठुति हुवे श्रुणोतु नः शुभगा बोधतु त्मना । सीव्यत्वपः । सूच्या छिद्यमानया ददातु वीरं शतदाय मुक्थ्यम् ।।**[6] अनेन पञ्चकम् । ततः शललीं -

---

१ - **पत्नीमुपवेश्य** इति स्यात् ।

२ - **औदुम्बरस्तवकेनावृत्तं** इति स्यात् ।

३ - **बधूकेमासाद्य** इति स्यात् ।

४ - **पुनरपि** इति स्यात् ।

५ - **जगती** इति स्यात् ।

६ - **अ.वे. - ७.४८.१**

Folio No. 37 - गृहीत्त्वा । प्र (प्रजापति ऋषिः)। जगति[१] (जगती छन्दः)। राका शलल्या सीमन्तोन्नयने (विनियोगः)। **ॐ यास्ते राके सुमतयः सुपेशसो याभिर्ददासि दाशुषे वसूनि । ताभिर्नो अद्य सुमना उपागहि सहस्रपोषं सुभगे रराणा ।।**[२] अनेन षष्ठम् । इत्यनेन प्रथमादिषष्ठपर्यन्तं मूदर्ध्नदेशे निदधाति । स्थालिपाकं पश्येदित्युक्तवा तिलतण्डुलमुद्गासाधितकृशररूपस्थालिपाकमुपरि दत्तघृतं बधूं दर्शयरपृच्छेत्[३]। प्र (प्रजापति ऋषिः)। अनु (अनुष्ठुप् छन्दः)। स्त्रीदेवता । बधूप्रश्ने विनियोगः । किं पश्यसीति पृष्ट्वां -

Folio No. 38 - स्थालिपाकं पश्यतीति वधूं पाठयेत् । प्र (प्रजापति ऋषिः)। अनु (अनुष्ठुप् छन्दः)। स्त्रीदेवता । स्थालीपाकावेक्षणे विनियोगः । **प्रजां पशुं सौभाग्यं मह्रीं दीर्घायुष्ट्वं पत्युः ।** इति मन्त्रं बधूं[४] पठेत् । ब्रह्मा चतसृभिः व्याहृतिभिः हूत्वा[५] पुनः कर्त्ता तिसृभिर्हूत्वा[६]ऽग्नौ समिधं दत्वा पूर्ववत्पर्युक्षणम् । अनुमङ्कस्थेति उदकाञ्जलिं कृत्वा दर्भजुटिकाहोमं वसोर्द्धारां हूत्वा[७] अग्निं प्रदक्षिणीकृत्य जलशेषं विनीय[८] पात्रमुदकेन पूरयित्वा । वामदेव्यं गायेत् । ततः कृशरस्थालीपा-

Folio No. 39 - कमेक्षणेन कांस्यपात्रे कृत्वा भुञ्जित[९] । भुञ्जत्यां(न्तीं) ब्राह्मणीं वाचयेत् । **वीरसूर्जीवसूर्देवकामास्योनाशन्नो भवद्वीपदे शं चतुष्पदे । आनः प्रजां जनयतु प्रजापति राजरसाय समनक्त्वर्यमा ।।** इति मन्त्रं पठित्वा ब्राह्मण्यो[१०] माङ्गल्याभिर्वाग्भिर्गायेयुः । ततो दशपरिमितब्राह्मणभोजनम् । ब्रह्माग्निविसर्जनम् । विष्णुस्मरणपूर्वकमछिद्रावधारणम् [११]। ब्राह्मणैराशीर्वादं कारयेत् । इति सीमन्तोन्नयनम् ।

---

१ - जगती इति स्यात् ।
२ - **अ.वे. - ७.४८.१**
३ - दर्शयनपृच्छेत् इति स्यात् ।
४ - **बधूः** इति स्यात् ।
५ - **हुत्वा** इति स्यात् ।
६ - **हुत्वा** इति स्यात् ।
७ - **हुत्वा** इति स्यात् ।
८ - **निनीय** इति स्यात् ।
९ - **भुञ्जीत** इति स्यात् ।
१० - **ब्राह्मणा** इति स्यात् ।
११ - **मच्छिद्रावधारणम्** इति स्यात् ।

चतुर्थोऽध्यायः
जातकर्मविधानम्

Folio No. 40 - अथ जातकर्म । तत्र जाते कुमारे पितॄणामामोदात् पुण्यं उदह [1]। तत्र तिलपूर्णानि सहिरण्यपात्राणि ब्राह्मणानाहूय पितृभ्यो दद्यादिति वचनान्मातृपूजापूर्वकं नान्दिमुखश्राद्धविधिना सहिरण्यपात्राणि नान्दिमुखमात्रादिभ्यो नवभ्यो ब्रह्मणेभ्यो दद्यात् । एतत्पुत्रजन्मनिमित्तकलौकिके कर्मणि वैदिकश्राद्धस्यानङ्गत्वात् । ततः पुत्रजन्माद्युत्तरकालमेव सूर्यग्रहादिनिमित्तकश्राद्धं वृद्धिश्राद्धमिति । तथा च मार्कण्डेयपुराणे **तत्र नैमित्तिकं वक्षे श्राद्धमाभ्युदयं तव ।। पुत्रजन्मनि -**

Folio No. 41 - यत्कार्यं जातकर्म समं नरैः ।।[2] **नाष्टकासु भवेत्श्राद्धं न श्राद्धे श्राद्धमिष्यते । न पोष्यति जातकर्मप्रोषिताजातकर्मसु ।।**[3] इति छन्दोगपरिशिष्टवचनम्। तज्जातकर्माङ्गश्राद्धनिषेधपरं चेति न विरोधः । गर्भाधानादसंस्कृते तु पुनर्जातकर्म कृत्वा दशरात्रादूर्ध्व स्नाताया मातुरुत्सङ्गे कुमारं निधाय पुंसवनादिक्रमेण कुर्यात् । तथा च शाङ्खायनपरिशिष्टे । अकृतसीमन्तकरणे प्रजायेत मातृरुत्सङ्गे[4] कुमारं स्थापयि-

---

१ - **तदहः** इति स्यात् ।

२ - मा.पु. - **२७.३-४**

३ - **छन्दोगपरिशिष्टम्**

४ - **मातुरुत्सङ्गे** इति स्यात् ।

Folio No. 42 - त्वा महाव्याहृतिभिर्हूत्वा पूर्ववत् होम इति । पुंसवनाद्यसंस्कृते जाते मातरि मृते पुंसवनसीमन्तोन्नयनकर्मप्रसभे[1] अंशाभिमर्षणाद्यमा(वा)त् । तद्दोषशमनार्थं मन्वादिधर्मशास्त्रोक्तधेनुत्रयदानम् । तद्यथा । शुभेऽहनि गोमयेनोपलिप्तायां भूमौ प्राङ्मुखोपविश्य वरुणपूजां कृत्वा संकल्पं कुर्यात् । **विष्णु**रित्यादि अमुकसगोत्रः श्रीमान् अमुकदेवशर्मा अमुकसगोत्रस्य मम पुत्रस्य पुंसवनसीमन्तोन्नयनकर्मलोपे तद्दोषशान्त्यर्थं मन्वादिधर्मशास्त्रो -

Folio No. 43 - क्तधेनुत्रयदानमहं कुर्वीय । ब्राह्मणायासनादिकं दत्वा धेनुत्रयं दद्यात् । ततो जातकर्मादि कुर्यात् । यदि कालातिक्रमेण जातकर्मदा(न)नैमित्तकं वृद्धिः भवति । कालातिक्रमदोषव्यपोहनार्थं पूर्ववत् प्रायश्चित[2]होमः कर्त्तव्यः । सर्वप्रायश्चितहोम[3] लिख्यते । प्रथमतो वरुणपूजा । संकल्पः । अमुकसगोत्रः श्रीमान् अमुकदेवशर्माण[4] अमुकगोत्रस्य मम पुत्रस्य जातकर्ममेधाजननं कालातिक्रमदोषव्यपोहनार्थं अनादेश-प्रायश्चित[5]होम-

Folio No. 44 - कर्माहं कुर्वीय । पुण्याहवाचनम् । मम पुत्रस्य जातकर्मणः कालातिक्रमदोषव्यपोहनार्थमनादेशप्रायश्चित[6]होमकर्मारम्भः क्रियते यदेति । शुचौ देशे लक्षणमुल्लिख्याग्निमुपसमाधाय इन्धनादिभिः प्रज्वाल्य पात्रमासादयेत् । उदकम् । आज्यस्थाली । सम्मार्गकुशाः । स्त्रुव[7] । स्त्रुक् । आज्यम् । समिद्द्वयम् । कुशाः । अक्षता । इत्यासाद्य । **इदं भूमे**रिति भूजपं कृत्वा तुष्णिमग्न्यवयवान् कींकृत्य पवित्रेस्थ्ये वैष्णव्यादिति पवित्रं छित्वा पूर्ववत् । पवित्रमार्जनम् ।

---

१ - **प्रसङ्गे** इति स्यात् ।

२ - **प्रायश्चित्त** इति स्यात् ।

३ - **सर्वप्रायश्चित्तहोमो** इति स्यात् ।

४ - **अमुकदेवशर्मा** इति स्यात् ।

५ - **प्रायश्चित्त** इति स्यात् ।

६ - **प्रायश्चित्त** इति स्यात् ।

७ - **स्त्रुवः** इति स्यात् ।

Folio No. 45 - आज्यसंस्कार[1] । उदकाञ्जलिसेकः । पर्युक्षणम् । स्रुवसम्मार्जनम् । प्रतपनाग्नौ समिधं दत्त्वा । पुण्याहवाचनं कृत्वा । स्रुवेणाज्याहुतिचतुष्टयं गृहीत्वा । प्र (प्रजापति ऋषिः)। गायत्री (गायत्री छन्दः)। अग्नि (अग्निर्देवता)। प्रायश्चित[2]होमे (विनियोगः)। ॐ भूः स्वाहा । इदमग्नये । प्र (प्रजापति ऋषिः)। उष्णिक् (उष्णिक् छन्दः)। वायु[3] (वायुर्देवता)। प्रायश्चित[4]होमे (विनियोगः)। ॐ भुवः स्वाहा । इदं वायवे । प्रजा (प्रजापति ऋषिः)। अनु (अनुष्टुप् छन्दः)। सूर्यो (सूर्यो देवता)। प्रायश्चित[5] (होमे विनियोगः)। इदं सूर्याय । प्र (प्रजापति ऋषिः)। बृहति[6] (बृहती छन्दः)। प्रजापति (प्रजापतिर्देवता)। सर्वप्रायश्चितहोमे विनियोगः । ॐ भूर्भुवस्स्वः स्वाहा। इदं प्रजापतये ।

Folio No. 46 - इत्याहुतिचतुष्टयं हूत्वा[7] । अग्नौ समिधं दत्वा । पूर्ववत्पर्युक्ष प्रदक्षिणीकृत्य जलशेषं निनीय पुनः पात्रमुदकेन पूरयित्वा अप उपस्पृश्य वामदेव्यं गायेत् ।

अथ जातकर्मविधिः । प्रथमतो वरुणपूजा । संकल्पः । मातृपूजा । वसोर्द्धारा । आभ्युदयिकश्राद्धं कुर्यात् । यदा कुमारं जातं कथयति । तदा पिता नाभिकृतस्तनं माधेहीत्यभिधाय सीतोदकेन सचेलं स्नात्वा प्रक्षालितशिलायां गर्भवत्या कुमार्या वा शिलापुत्रमनावर्त्त-

---

१ - **आज्यसंस्कारः** इति स्यात् ।

२ - **प्रायश्चित्त** इति स्यात् ।

३ - **वायुः** इति स्यात् ।

४ - **प्रायश्चित्त** इति स्यात् ।

५ - **प्रायश्चित्त** इति स्यात् ।

६ - **बृहती** इति भवितव्यम् ।

६ - **हुत्वा** इति स्यात् ।

Folio No. 47 - यन् व्रीहियवौ सप्तवारान् पिष्ट्वा दक्षिणहस्तानामिकाङ्गुष्ठाभ्यां गृहीत्वा पुण्याहवाचनं कुर्यात् । अमुकसगोत्रस्य मच्छिशोजातकर्मारम्भः[1] क्रियते यदेत्यादि । प्र (प्रजापति ऋषिः)। अनु (अनुष्टुप् छन्दः)। अन्नं देवता । बालस्य व्रीहियवप्राशने विनियोगः । **ॐ इयमाज्ञेदमन्नमिदमायरिदममृतम् ।** अनेन कुमारस्य जिह्वायां निर्माष्टिः । दिसतुष्णि[2] ।

अथ मेधाजननम् । तत्र स्त्रैवसुवर्णेन पात्रेण सर्पिषं गृहीत्वा । प्र (प्रजापति ऋषिः)। अनु (अनुष्टुप् छन्दः)। मित्रावरुणाग्न्यश्विनौ देवता ।

Folio No. 48 - वालस्य सर्पिप्राशने विनियोगः । **ॐ मेधा ते मित्रावरुणौ मेधामग्निर्दधातु ते । मेधा ते अश्विनौ देवा दाधत्तां पुष्करस्त्रजौ ।**[3] अनेन कुमारस्य जिह्वायां निर्माष्टिः । तथैव पुनः घृतं गृहीत्वा । प्र (प्रजापति ऋषिः)। गायत्री (गायत्री छन्दः)। इन्द्रो (इन्द्रो देवता)। सर्पिप्राशने[4] विनियोगः । **ॐ सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् । सनि मेधामया सिपम् स्वाहा ।।**[5] अनेन पुनर्निर्माष्टिः । अ[6] । ततो वामदेव्यं गायेत् । नाभिकृतस्तनं देहीति पित्रा[7] वृयात्[8]। ततो नाभिच्छेदनम् । तदूर्द्धं मातृकुमारयो-

Folio No. 49 - रशुचित्वमादशरात्रात् । मातृकुमारयोराशीर्वादः । ॐ इति जातकर्मसमाप्तम् ।

---

१ - मच्छिशोर्जातकर्मारम्भः

२ - पदं निष्कासनीयम् ।

३ -

४ - सर्पिः प्राशने

५ - **ऋ.वे. - १.१.८.६, सा.वे. - १७९, वा.य. - ३२.१३, तै.आ. - १०.१.४**

६ - पदं नान्वितमत्र ।

७ - पिता

८ - ब्रूयात्

पञ्चमोऽध्यायः
बहिर्निष्क्रमणकर्मविधानम्

Folio No. 49 - अथ बहिर्निष्क्रमणम् । वरुणपूजा । संकल्पः । कालातिक्रमे पूर्ववत्प्रायश्चित[1]होमः । मातृपूजा । वसोर्द्धारा । वृद्धिश्राद्धम् । जाते कुमारे यस्तृतीये[2] शुक्लपक्षस्तस्य तृतीयायां तिथौ प्रातः सशिरस्ककुमारं स्नापयित्वा अस्तसमये सवितरि लोहितमये पिता बहिरुपलिप्ते शुचौ देशे कृताञ्जलि-रुत्तानहस्तश्चन्द्रा-

Folio No. 50 - भिमुखस्तिष्ठेत् । पुण्याहवाचनम् । ज्यौत्स्नकर्मारम्भः क्रियते यदेत्यादि ।अथ माता शुचिना वस्त्रेण मुखादन्यत्र कुमारं वेष्टयित्वा पश्चिमाभिमुखी दक्षिणहस्तस्थितं उत्तरशिरसं दक्षिणपादं कुमारं पित्रे समर्प्य पृष्ठदेशे चोत्तरादि दिशं गत्वा प्राङ्मुख्यवतिष्ठेत् । ततो गृहीतकुमारः पिता जपेत् । **ॐ यत्तेसु-**

---

१ - **प्रायश्चित्त** इति स्यात् ।

२ - **यस्तृतीयः** इति स्यात् ।

Folio No. 51 - शिमेत्यादि मन्त्राणाम् । प्र (प्रजापति ऋषिः)। अनु (अनुष्टुप् छन्दः)। चन्द्रेन्द्राग्नयो देवता । बालकस्य चन्द्रदर्शने विनियोगः । **ॐ यत्तेसुशिमे हृदयं हितमन्तः प्रप्रजापतौ । वेदाहं मन्ये । तद्ब्रह्माहं पौत्रमघं निशा । यत्पृथिव्या अनामृतं दिवि चन्द्रमसिश्रितम् । वेदामृतस्याहं नाममाहं पौत्रमघंरिषम् । इन्द्राग्निशर्मयछतं प्रजायै मे प्रजापतिः । यथायान्नमसीयेत पुत्रो जनित्रा अधि ।** एतान् मन्त्रान् पठित्वा चन्द्रदर्शनं कृत्वा तथैव तुष्णिं वालकं मात्रे प्रदाय वामदेव्यं गीत्वा यथाशक्तिं ब्राह्मणभोजनानि दत्वा अछिद्रावधार्य[1] -

Folio No. 52 - गृहं प्रविशेत् । श्राद्धमपवर्गभोजनं कुर्वते शिष्टैः । तत्र प्रमाणाभावादस्माभिः न लिखितम् । इति बहिर्निष्क्रमणम् ।

१ - **अच्छिद्रमवधार्य** इति स्यात् ।

षष्ठोऽध्यायः
चन्द्रार्घ्यकर्मविधानम्

Folio No. 52 - अथ चन्द्रार्घ्यः । कालातिक्रमे पूर्ववत्प्रायश्चित[1]होमः । ततः शुक्लचूर्णेन पीठस्योपरि चन्द्रघटनम् । तत्र रौप्यचन्द्रस्थापनम् । पुण्याहवाचनम् । मम पुत्रस्य चन्द्रार्घ्यकर्म क्रियते यदेत्यादि । तत ऊद्‌र्ध्वमपरशुक्लपक्षत्रयेऽपि तृतीयायां तिथौ सायं सन्धामतिक्रम्य[2] चन्द्राभिमुखः प्रविशेद् गृहे -

Folio No. 53 - वा शुचौ देशे उदकेन ताम्रादिपात्रे पुष्पचन्दनाक्षतयुक्तेनाञ्जलिं पूरयित्वा । ॐ प्र (प्रजापति ऋषिः)। अनु (अनुष्टुप् छन्दः)। चन्द्रो (चन्द्रो देवता)। चन्द्रायाञ्जलिदाने विनियोगः । **ॐ यददश्चन्द्रमसि कृष्णं पृथिव्याः हृदयङ्गश्रितम् । तदहं विद्याङ्गस्तत्पश्यमाहं पौत्रमघंरुदम् ।।**[3] अनेनाञ्जलिं त्यजेत् । तुष्णिं वारद्वयम् । वामदेव्यं गानम् [4]। एवं कृते कुमाराभ्युदयो भवत्वेति[5] प्रयोजनम् । केचिदेकस्यां तृतीयायां तिलाञ्जलिन् मन्त्रेणोत्सार्याद्वि तुष्णिमुत्सृजेत् । तदेतत्करणादपि वरम् । इति काम्यं नित्यञ्च ।

Folio No. 54 - इति चन्द्रार्घ्यकर्म ।

---

१ - **प्रायश्चित्त** इति स्यात् ।

२ - **सन्ध्यामतिक्रम्य** इति स्यात् ।

३ -

४ - **वामदेव्यगानम्** इति स्यात् ।

५ - **भवत्विति** इति स्यात् ।

सप्तमोऽध्यायः

नामकरणकर्मविधानम्

Folio No. 54 - अथ नामकरणम् । जन्मनाद्द्वादशरात्रे शतरात्रे संवत्सरे वायतोत्तरायणादिस्थं पक्षमाश्रिय[1] पुण्येऽहनि । वरुणपूजा । संकल्पः । उक्तकालातिक्रमे पूर्ववत्प्रायश्चित[2]होमः । ततः मातृपूजा । वसोर्द्धारा । आभ्युदयिकश्राद्धं कृत्वा । पञ्चभूसंस्कारं पूर्ववत्तमग्निं प्रणीय ऋष्यादिकं कृत्वा । पार्थिवनामाग्निं संस्थाप्य । पात्रासादयेत्[3] । ब्रह्मावरणम्[4] । मम पुत्रस्य नामकरण-कर्माङ्गहोमकर्मणि कृताकृता-

Folio No. 55 - वेक्षकत्त्वेति । पात्रासादनम् । उदकम् । वर्हि[5] । इध्म । स्रुव[6] । आज्यम् । समिद्द्वयम् । कुशाः । अक्षता । सम्मार्गकुशांश्चासादयेत् । अथ माता सशिरस्कं स्नातं कुमारं शुद्धवस्त्रेण मुखवर्ज्याच्छादितं भर्त्तुर्दक्षिणदेशस्थिता दक्षिणपादमुत्तरशिरसम् । भर्त्रे प्रदाय तत्पृष्ठदेशे गत्वोत्तरस्यां दिश्युदगग्र-कुशासनोपविष्ठायां मातरि समर्प्य हस्तौ प्रक्षाल्याग्नेः पश्चिमदेशे उपविश्य । भूजप[7] । परिसमूहन[8] । परिस्तरण[9] । इध्मदान[10] । पवित्रकरण[11] । पवित्रमार्जन[12] ।

---

१ - **पक्षमाश्रित्य** इति स्यात् ।
२ - **प्रायश्चित्त** इति स्यात् ।
३ - **पात्रमासादयेत्** इति स्यात् ।
४ - **ब्रह्मवरणम्** इति स्यात् ।
५ - **बर्हिः** इति स्यात् ।
६ - **स्त्रुवः** इति स्यात् ।
७ - **भूजपः** इति स्यात् ।
८ - **परिसमूहनम्** इति स्यात् ।
९ - **परिस्तरणम्** इति स्यात् ।
१० - **इध्मदानम्** इति स्यात् ।
११ - **पवित्रकरणम्** इति स्यात् ।
१२ - **पवित्रमार्जनम्** इति स्यात् ।

Folio No. 56 - आज्यसंस्कार[१] । स्रुवसम्मार्जन[२] । प्रतपन[३] । उदकाञ्जलिसेक[४] । पर्युक्षण[५] । विरुपाक्षजप[६] । समित्प्रक्षेश्च । व्याहृतिहोम[७] । ॐ प्रजापति ऋषिः । गायत्री छन्दः । अग्निर्देवता । व्याहृतिहोमे विनियोगः । ॐ भूः स्वाहा । इदमग्नये । प्र (प्रजापति ऋषिः)। उष्णि (उष्णिक् छन्दः)। वायु[८] (वायुर्देवता)। व्याहृति (व्याहृतिहोमे विनियोगः)। स्वः स्वाहा । इदं सूर्याय । प्र (प्रजापति ऋषिः)। बृह (बृहती छन्दः)। प्रजा (प्रजापतिर्देवता)। समस्तव्याहृति । ॐ भूर्भुवस्स्वः स्वाहा । इदं प्रजापतये । इत्याहुतिचतुष्टयं हूत्वा[९] ।

Folio No. 57 - पुण्याहवाचनम् । नामकरणहोमकर्मारम्भः क्रियते यदेत्यादि । ततः कुमारस्य जन्मतिथिनक्षत्रदेवताहोमं कुर्यात् । यदा प्रतिपदि जातस्तदा प्रतिपदे स्वाहा । इदं प्रतिपदे । ॐ ब्रह्मणे स्वाहा । इदं ब्रह्मणे । एवं द्वितीयायां द्वितीयै[१०] त्वष्ट्रेः[११] सर्वप्रणवादि स्वाहान्तो होमः । तृतीयायै जनार्दनाय । चतुर्थ्यै यमाय । पञ्चम्ये[१२] सोमाय । षष्ठ्यै कुमाराय । सप्तम्यै मुनिभ्यः । अष्टम्यै वसुभ्यः । नवम्यै -

Folio No. 58 - पिशाचेभ्यः । दशम्यै धर्माय । एकादश्यै रुद्राय । द्वादश्यै रवये । त्रयोदश्यै किरणभृते । चतुर्दश्यै यक्षेभ्यः । अमावास्यायै पितृभ्यः । पौर्णमास्यै विश्वेभ्यो देवेभ्यो । इति । **नामधेये मुनिवसुपिशाचबहुवत्सदा । यक्षाश्च पितरो देवा यष्टव्यातिथिदेवता** । इति कर्मादिप्रवचनात् । अथ नक्षत्रदेवताहोमप्रयोग[१३] लिख्यते । ॐ अश्विनिभ्यां स्वाहा । इदमश्विनिभ्यः । अश्विभ्यां स्वाहा । इदमश्विभ्याम् ।

---

१ - **आज्यसंस्कारः** इति स्यात् ।
२ - **स्रुवसम्मार्जनम्** इति स्यात् ।
३ - **प्रतपनम्** इति स्यात् ।
४ - **उदकाञ्जलिसेकः** इति स्यात् ।
५ - **पर्युक्षणम्** इति स्यात् ।
६ - **विरुपाक्षजपः** इति स्यात् ।
७ - **व्याहृतिहोमः** इति स्यात् ।
८ - **वायुः** इति स्यात् ।
९ - **हुत्वा** इति स्यात् ।
१० - **द्वितीयायै** इति स्यात् ।
११ - **त्वष्ट्रे** इति स्यात् ।
१२ - **पञ्चम्यै** इति स्यात् ।
१३ - **प्रयोगो** इति स्यात् ।

Folio No. 59 - एवं सर्वत्र । भरणीभ्यो । यमाय । कृतिकाभ्यः । अग्नये । रोहिणीभ्यः । प्रजापतये । मृगशीर्षे[१] । सोमाय । आर्द्रायै । रुद्राय । पुनर्वसु[२] । अदित्ये[३] । पुष्याय । बृहस्पतये । अश्लेषायै । सर्पेभ्यः । मघायै । पितृभ्यः । पूर्वाफाल्गुन्यै । भगाय । उत्तरफाल्गुन्यै । अर्यम्णे । हस्तायै । सवित्रे । चित्रायै। त्वष्ट्रे । स्वात्यै । वायवे । विशाखायै । इन्द्राग्निभ्याम् । अनुराधायै । मित्रायै । ज्येष्ठायै । इन्द्राय ।

Folio No. 60 - मूलायै । निर्ऋतये । पूर्वाषाढायै । अद्भ्यः । उत्तरायणायै । विश्वेभ्य[४] देवेभ्य[५] । श्रवणायै । विष्णवे । धनिष्ठायै । वसुभ्यः । शतभिषायै । वरुणाय । पूर्वभाद्रपदायै । अजैकपदे । उत्तरभाद्रपदायै । अहिबुध्न्याय । रेवत्यै। पुष्णे । एवं प्रजापत्यादि तिथिदेवतानक्षत्रदेवताभ्यः आहुतिपञ्चकं हूत्वा कुमारस्य मुखनासिकानेत्राणि स्पृशेत् । कोसिसत्वाहु इत्येतेत्त्रयोः[६] । प्र (प्रजापति ऋषिः)। अनु (अनुष्टुप् छन्दः)। बृहस्पति[७] (बृहस्पतिर्देवता)।

Folio No. 61 - कुमारस्य नामकरणे विनियोगः । **कौसिकतमोश्येषोस्यमृतोऽसि । आहस्यत्यं मासं प्रविशासौ देवदत्तशर्मन् ।। सहाह्ने परिददाहहस्त्या रात्र्यै परिददातु रात्रिस्त्वाहोरात्राभ्यां परिददात्वहोरात्रौ वर्द्धमासेभ्यः परिदत्ताम-र्द्धमासास्त्वामासेभ्यः परिददतुमासस्तृड्भ्यः परिददस्त्यासंवत्सराय परिददतु संवत्सरस्त्वायषे जरायै परिददातु देवदत्तशर्मन् ।** इमौ मन्त्रौ जपेत् । ततः पिता मातुः कर्णे देवदत्तशर्म-

---

१ - मार्गशीरसे

२ - पुनर्वसवे

३ - आदित्यै

४ - विश्वेभ्यः

५ - देवेभ्यो

६ - कोसिसत्वाहु इत्येतेत्त्रयोः' इति पङ्क्ति अनावश्यकी ।

७ - बृहस्पतिः

Folio No. 62 - निति नाम कथयित्वा कुमारस्य दक्षिणकर्णे माता देवदत्तशर्मासीति नाम कथयित्वा मात्रे कुमारं दत्वा । प्रायश्चितार्थं[1] ब्रह्मा महाव्याहृतिचतसृभिर्हूत्वा[2] पुनः कर्त्ता तिसृभिर्हूत्वा[3] । अग्नौ समिधं दत्वा । देव सवितरि इति पूर्ववत्पर्युक्ष[4] । अतीतेऽनुमङ्कस्थेति उदकाञ्जलिं वेष्टयित्वा दर्भजुटिकाहोमवसोर्द्धारां हूत्वा अग्निं प्रदक्षिणीकृत्य ब्रह्मणे गां दक्षिणां दत्वा । दशब्राह्मणभयोजनानि[5] दत्वा । उदकशेषं निनीय पुनः पात्रमुदकेन पूरयित्वा अप उपस्पृश्य ।

Folio No. 63 - वामदेव्यं गायेत् । नामकरणं शिवादिदेवतावाचकं पूर्वपुरुषैश्च वृत्तं वर्गाद्यक्षरद्वयात्मकं मध्ये यरलवानामकेन[6] द्वाभ्यां त्रिभिश्चः चतुर्भिर्युक्तं दीर्घान्तं विसर्जनीयान्तं वा पुरुषाणां नाम भवति । यथा विष्ण्वादि वासुदेवो नारायणेत्यादि । अछिद्रावधार्य[7] ब्राह्मणैराशीर्वादं कारयेत् । इति नामकरणं समाप्तम् ।

---

१ - **प्रायश्चित्तार्थं** इति स्यात् ।

२ - **चतसृभिर्हुत्वा** इति स्यात् ।

३ - **तिसृभिर्हुत्वा** इति स्यात् ।

४ - **पर्युक्ष्य** इति स्यात् ।

५ - **दशब्राह्मणेभ्यो भोजनानि** इति स्यात् ।

६ - **यरलवनामकेन** इति स्यात् ।

७ - **अच्छिद्रमवधार्य** इति स्यात् ।

अष्टमोऽध्यायः
अन्नप्राशनकर्मविधानम्

Folio No. 63 - अथान्नप्राशनम् । जैमिनिगृह्योक्तान्नप्राशनं यथा उक्तम् । वरुणपूजा । संकल्पः । पुण्याहवाचनम् । पूर्ववत्प्रायश्चित[१]होमः ।

Folio No. 64 - ततो मातृपूजा । वसोर्द्धारा । आभ्युदयिकश्राद्धम् । तदभावे ब्राह्मणभोजनम् । अथान्नप्राशनकर्म । पूर्वपक्षे पुण्ये नक्षत्रे । ब्राह्मणान् भोजयित्वा हविष्यान्नं प्राशयेत् । इत्ययम् । पक्षे षष्ठे मासि कर्त्तव्यम् । गृहपाकान् सर्वान् कटु-तिक्त-कषाय-अम्ल-मधुर-व्यञ्जनादिक्रमेण । घृत-दधि-दुग्धसहितेन । मधुपर्केण कांस्यपात्रैकं कृत्वा । पुस्तकम् । सुवर्णम् । कठिनी । मृत्खण्डम् । अन्नम् । गोमयम् । धान्यमित्यासाद्य पुत्रस्याग्रे समर्प्य ।

Folio No. 65 - यस्माद्रोचते तद्गृहाण इति प्रैषः । तदनन्तरम् । यथा इति तत्सर्वमुपतिष्ठेत् । वस्त्वेकग्रहणानन्तरं तल्लाभ इति चिन्तयेत् । पुस्तकेन विद्यालाभः । कठिनी च सुवर्णेन रत्नलाभः । मृत्खण्डे भूमिलाभः । अन्नेनान्नलाभः । धान्येन धान्यलाभः । ततः पुण्याहवाचनम् । अन्नप्राशनकर्मारम्भः क्रियते यदेत्यादि । ततः सर्वस्माद्रसान्नमादाय कांस्यपात्राद्गृहीत्वा अङ्गुष्ठमध्यमाभिः प्राशयेत् । **हन्त** इति मन्त्रेण । ॐ प्र (प्रजापति ऋषिः)।

---

१ - **प्रायश्चित्त** इति स्यात् ।

Folio No. 66 - बृहति (बृहती छन्दः)। अन्नपतिर्देवता । अमुकबालस्यान्नप्राशने । **ॐ अन्नपतेऽन्नस्यान्नो धेही अन्नमिवस्य सष्मिणः । प्रपदातारं तारिष भजिनो धेही द्विपदे शं चतुष्पदे ।।** अनेन बालस्य मुखे हविष्यान्नं दद्यात् । आचमनम् । शेषं मातुर्भोजनम् । दशब्राह्मणभोजनम् । अछिद्रावधार्य[1] ब्राह्मणैराशीर्वादं कारयेत् । इत्यन्नप्राशनम् ।

---

१ - **अच्छिद्रमवधार्य** इति स्यात् ।

नवमोऽध्यायः
चूडाकरणकर्मविधानम्

Folio No. 66 - अथ चूडाकरणम् । पूर्वदिवसे रात्रौ वरुणपूजा ।

Folio No. 67 - पुण्याहवाचनम् । स्वश्चूडोपनयने[1] कर्त्तव्ये तदङ्गतया गन्धाधिवासबर्ह्स्शिालारोपणहरिद्राधिवासकर्मारम्भः क्रियते यदेत्यादि । ब्राह्मणा आमलकीं गृहीत्वा । **श्रायतं इवसूरायां चो । विश्वा दिद्रा पि । स्यभा क्षान्तार्धे । वसु निजा तो जनिमा घि । नियोजासा छु । प्रतिभा रान्नदिधिम घिप्रा तिकः । भा गान्ना दाकः । हुक । धि मा टी । औवाकु । श्रयेत् । ॐ सोमदद-**

Folio No. 68 - द्गन्धर्वाय गन्धर्वोददद्ग्नये । रयिं च पुत्रैन्श्चाददग्निमह्यमथो इमाम् । प्रतिभा ग न्नदा ईधानिमाः चोः। प्रता ईमा सां घि । नदा ईधा ईमाः कैः आलर्षिरा तिवसुहा पि । डपास्त्वदा इछु । भद्रां इन्द्रस्यरा तयः छु भा द्राः कः इन्द्रस्या चाक । हुतः । त योः टी । ओदाकु । श्रियेत् । ओ । सोमोवदेत् । भद्रा इन्द्रस्यरा तायाः चोः । भद्रा इन्द्रा धि स्यत्वा तायां वै । यो अस्य वा सविध -

---

१ - **श्वश्चूडोपनयने** इति स्यात् ।

Folio No. 69 - तं घि । नरोषाता इछु । मनो दा ना यचो दयत्नते । म नाः कः । दा नाया चेकः । हुकः ज याः टी । ओदाकु । श्रियेत् । सोमो ददिति । इत्यनेन गन्धेनाधिवासयेत् । वेद्यां पूर्वे गर्त्तं खात्वा तत्र गणपति[१] । वासुकी[२] । तक्षक[३] । कर्कोटक[४] । शङ्ख[५] । कुलिक[६] । पद्म[७] । महापद्म[८] । इत्येतानावाह्य गन्धादिभिः संपूज्य । वंशदण्डद्वयं गृहीत्वा । **ॐ स्थिरो भव विभ्वङ्क आशुर्भव वार्ज्वन् । पृथुर्भवशुषदस्त्वमग्ने ।।**

Folio No. 70 - इत्यारोप्य पुरुषवाहण इति मुद्भिरापूर्य्य[९] । तदुपरि । अक्षता । धान्य[१०] । मुद्ग[११] । यव[१२] । तिला । इति पञ्चब्रीहिं[१३] प्रक्षिपेत् । पुनः गन्धाधिवासवत् हरिद्राधिवासं कारयेत् । ततः अछिद्रावधार्याशिर्वादं[१४] कारयेत् । ॐ । जन्मप्रभृति तृतीये वर्षे वर्तमाने उदगयने । पूर्वपक्षे पुण्येऽहनि चन्द्रतारानुकुले[१५] प्रातश्चूडाकरणं कुर्यात् । तद्यथा । प्रथमतो वरुणपूजा । कालातिक्रमे पूर्ववत्प्रायश्चि[१६]तहोमः । संकल्पः ।

Folio No. 71 - चूडाकरणकर्मणः कालातिक्रमदोषव्यपोहनार्थं सर्वप्रायश्चित-होमकर्माहं कुर्वीय । तत्र क्रमः । लक्षणपूर्वकसत्यनामाग्निमुपसमाधाय इन्धनादिभिः प्रज्वाल्य । भूजपं कृत्वा । तुष्णिमग्न्यावायवानेकीकृत्य[१७] पात्रमासादयेत् । नात्र ब्रह्मा । उदकम् । आज्यस्थाली । कुशाः । स्रुवः । स्रुक् । आज्यम् । समिद्वयम् । अक्षता । इत्यासाद्य । पवित्रकरणम् । पवित्रमार्जनम् । आज्यसंस्कार । स्रुवसम्मार्जनम् । प्रतप्य स्थाप्य[१८] । उदकाञजलिसेक । पर्युक्ष्याग्नौ समिधं दत्वा । व्याहृति -

---

१ - **गणपतिः** इति स्यात् ।
२ - **वासुकिः** इति स्यात् ।
३ - **तक्षकः** इति स्यात् ।
४ - **कर्कोटकः** इति स्यात् ।
५ - **शङ्खः** इति स्यात् ।
६ - **कुलिकः** इति स्यात् ।
७ - **पद्मः** इति स्यात् ।
८ - **महापद्म** इति स्यात् ।
९ - **मृद्भिरापूर्य्य** इति स्यात् ।
१० - **धान्यं** इति स्यात् ।
११ - **मुद्गः** इति स्यात् ।
१२ - **यवः** इति स्यात् ।
१३ - **पञ्चव्रीहिन्** इति स्यात् ।
१४ - **अच्छिद्रमवधार्याशीर्वादं** इति स्यात् ।
१५ - **चन्द्रतारानुकूले** इति स्यात् ।
१६ - **प्रायश्चित्त** इति स्यात् ।
१७ - **तुष्णिमग्नावायवानेकीकृत्य** इति स्यात्।
१८ - **संस्थाप्य** इति स्यात् ।

Folio No. 72 - होमं कुर्यात् । स्रुवेणाज्याहुतिचतुष्टयम् । स्रुचां गृहीत्वा । प्र (प्रजापति ऋषिः)। गायत्री (गायत्री छन्दः)। अग्नि[1] (अग्निर्देवता)। व्याहृति (व्याहृतिहोमे विनियोगः)। ॐ भूः स्वाहा । इदमग्नये । प्र (प्रजापति ऋषिः)। उष्णिक् (उष्णिक् छन्दः)। वायु[2] (वायुर्देवता)। व्याहृति (व्याहृतिहोमे विनियोगः)। ॐ स्वः स्वाहा । इदं सूर्याय । प्र (प्रजापति ऋषिः)। बृहति[3] (बृहती छन्दः)। प्रजापति (प्रजापतिर्देवता)। समस्तव्याहृति । ॐ भूर्भुवस्स्वः स्वाहा । इदं प्रजापतये । इति व्याहृतिचतुष्टयं हूत्वा[4] समिधं दत्वा पूर्ववत्पर्युक्ष्य अप उपस्पृश्य वामदेव्यं गायेत् । इति प्रायश्चित[5]विधिः । अथ चूडाकरणम् ।

Folio No. 73 - वरुणपूजा । संकल्पः । मम पुत्रस्य अमुककुमारस्य चूडाकरणकर्माहं कुर्वीय । मातृपूजा । वसोर्द्धारा । आभ्युदयिकश्राद्धम् । प्रधानगृहस्य पूर्वभागे बहिः शालायामुपलिप्ते पञ्चभूसंस्कारं कृत्वा । सत्यनामाग्निं संस्थाप्य समिधं दत्वा । ब्रह्माणं वृणुयात् । ब्राह्मणपूजा[6] । अमुकसगोत्रस्यामुकदेवशर्मणो मम पुत्रस्य चूडाकरणकर्माङ्गहोमकर्मणि कृताकृतावेक्षकत्वेन ब्राह्मणं[7] त्वामहं वृणे । विप्र वृतोऽस्मिन् युक्त्या[8] यथाविधिमुपवेशयेत् । ततोऽग्ने-

Folio No. 74 - रुत्तरतः दर्भा इत्यासादयेत् । उदकम् । बर्हि[9] । इध्म । स्रुव[10] । आज्यम् । समिद्द्वयम् । कुशाः । अक्षता । सम्मार्गकुशाः । पूर्णपात्रञ्चेत्यासाद्य । ततोऽग्नेर्दक्षिणतः साग्रकुशपत्रैः सप्ताभिरेकीकृत्यैकबद्धास्तिस्रोदर्भपिञ्जल्यः । कांस्यपात्रस्थमुष्णोदकम् । ताम्रमयक्षुरम् । तदभावे दर्पणं वा । त्रिः श्वेताशलली । क्षुरपाणिर्नापितः । इति प्रत्यक्संस्थानासादयित्वा[11] । अग्नेरुत्तरतो वृक्षगोमयपिण्डम्[12] । वृथा पक्वं तिलतण्डुलमिश्रितं उपरि घृतं कृशरस्थालीपाकं -

---

१ - **अग्निः** इति स्यात् ।

२ - **वायुः** इति स्यात् ।

३ - **बृहती** इति स्यात् ।

४ - **हुत्वा** इति स्यात् ।

५ - **प्रायश्चित्त** इति स्यात् ।

६ - ब्रह्मणः पूजा

७ - **ब्रह्माणं** इति स्यात् ।

८ - **वृतोऽस्मिन्नित्युक्त्वा** इति स्यात् ।

९ - **बर्हिः** इति स्यात् ।

१० - **स्रुवः** इति स्यात् ।

११ - **प्रत्यक्संस्थानासाद्य** इति स्यात् ।

१२ - **वृषगोमयपिण्डं** इति स्यात् ।

Folio No. 75 - प्राक्संस्थं चासाद्याग्नेः पुरस्तात् । ब्रीहि । यव । तिल । मासैश्चत्वारि पात्रणि पूरयित्वा । दक्षिणसंस्थानि निवध्यात्[1] । अथ माता शुद्धवस्त्रेण मुखवर्ज्यं कुमारमासाद्याग्नेः पश्चिमस्यां[2] दिशि पृष्ठदेशे भर्तृरुत्तरतो[3] गत्वा गृहीतकुमारप्राङ्मुख्युदगग्रेषु कुशेषूपविशेत् । ततः कर्त्ता । भूजप[4] । परिसमूहन[5] । परिस्तरण[6] । इध्मदान[7] । पवित्रकरण[8] । पवित्रमार्जन[9] । आज्यसंस्कार[10] । स्रुवसम्मार्जन[11] । प्रतपन[12] । स्थापन[13] । उदकाञ्जलिसेक[14] । पर्युक्षण[15] ।

Folio No. 76 - विरुपाक्षजप । समित्प्रक्षेपश्च । स्रुवेणाज्यं गृहीत्वा । पूर्ववत् ऋष्यादिकं स्तुत्वा । ॐ भूः स्वाहा । भुवः स्वाहा । स्वः स्वाहा । भूर्भुवस्स्वः स्वाहा । इति चतसृभिर्व्याहृतिभिर्हूत्वा[16] । गृहीतकुमाराय मातुः पश्चिमतः प्राङ्मुखोवतिष्ठेत् । कुमारे[16]ऽप्राङ्मुख एव कर्त्तव्यः । पुण्याहवाचनम् । अमुकसगोत्रस्य मम पुत्रस्य अमुककुमारस्य चूडाकरणकर्मारम्भः क्रियते यदेत्यादि । सवितारं मनसा चिन्तयन् नापितं पश्यन् । प्र (प्रजापति ऋषिः)। अनु (अनुष्टुप् छन्दः)। सविता (सविता देवता)। चूडाकरणे (विनियोगः)।

---

१ - **निदध्यात्** इति स्यात् ।
२ - **पश्चिमायां** इति स्यात् ।
३ - **भर्त्तुरुत्तरतो** इति स्यात् ।
४ - **भूजपः** इति स्यात् ।
५ - **परिसमूहनम्** इति स्यात् ।
६ - **परिस्तरणम्** इति स्यात् ।
७ - **इध्मदानम्** इति स्यात् ।
८ - **पवित्रकरणम्** इति स्यात् ।
९ - **पवित्रमार्जनम्** इति स्यात् ।
१० - **आज्यसंस्कारः** इति स्यात् ।
११ - **स्रुवसम्मार्जनम्** इति स्यात् ।
१२ - **प्रतपनम्** इति स्यात् ।
१३ - **स्थापनम्** इति स्यात् ।
१४ - **उदकाञ्जलिसेकः** इति स्यात् ।
१५ - **पर्युक्षणम्** इति स्यात् ।
१६ - हुत्वा इति स्यात् ।
१७ - कुमारो

Folio No. 77 - आयमगात्सविता क्षुरेण । इति जपेत् । सोष्णदकं[1] कांस्यपात्रं पश्यन् वायुं मनसा चिन्तयेत् । प्र (प्रजापति ऋषिः)। अनु (अनुष्टुप् छन्दः)। वायु (वायुर्देवता)। चूडाकरणे (विनियोगः)। **उष्णेन वा उदकेनैधी** । इति जपेत् । ततः कांस्यपात्रज्जलं[2] गृहीत्वा । प्र (प्रजापति ऋषिः)। अनु (अनुष्टुप् छन्दः)। आपो (आपो देवता)। चूडाकरणे (विनियोगः)। **ॐ आप उन्दन्तु जीवसे** ।।[3] अनेन कुमारस्य शिरसो दक्षिणपार्श्वमार्द्रकरोति । शलिलं गृहीत्वा केशान् त्रिभागं कृत्वा । प्र (प्रजापति ऋषिः)। अनु । विष्णुदेव (विष्णुर्देवता)। चूडाकरणे (विनियोगः)। **विष्णुर्दच्चष्टौसि** ।[4] इति पठेत् ।

Folio No. 78 - ततो दर्भपिञ्जलिमेकं गृहीत्वा । ॐ प्र (प्रजापति ऋषिः)। यजु[5] (याजुषी छन्दः)। औषधी (औषधी देवता)। दर्भपिञ्जलिनिधाने (विनियोगः)। **ॐ ओषधे त्रायस्वेनम्** ।।[6] इति दर्भपिञ्जलिमेकं दक्षिणकर्णोपरि स्थितार्द्रिकृत्य[7] केशेषु अभिशिरोऽग्रं स्थाप्य[8] दक्षिणावर्त्तेन वेष्टयित्वा । वामहस्तेन ताम्रमयक्षुरं गृह्णीयात् । प्र (प्रजापति ऋषिः)। यजु[9] (याजुषी छन्दः)। स्वधितिर्देवता । ताम्रमयक्षुरनिधाने विनियोगः । **स्वधिते मैनः हिंसी** । इति मन्त्रेण ताम्रमयक्षुरं तदभावे दर्पणं वा निदधाति । ततः । प्र (प्रजापति ऋषिः)। अनु (अनुष्टुप् छन्दः)। पूषा (पूषा देवता)। क्षुरप्रेरणे (विनियोगः)। **ॐ येन पूषा बृ-**

---

१ - **सोष्णोदकं** इति स्यात् ।

२ - **कांस्यपात्राज्जलं** इति स्यात् ।

३ - **आप उन्दन्तु जीवसे दीर्घायुत्वाय वर्चसे ।। (तै.सं. - १.२.१.१)**

४ - **मन्त्रमत्र नान्वितम् ।**

५ - **याजु** इति स्यात् ।

६ - **तै.सं. - १.२.१.१, काठ. - २.१, क. - १.१३, २.९**

७ - **स्थितमाद्रीकृत्य** इति स्यात् ।

८ - **संस्थाप्य** इति स्यात् ।

९ - **याजु** इति स्यात् ।

Folio No. 79 - हस्पतेर्वायोरिन्द्रस्य चावपत् । तेन ते वपामि ब्रह्मणा जीवातवे जीवनाय दीर्घायुष्ट्वाय वर्च्चसे ।।[१] इत्यनेन मन्त्रेण ताम्रमयक्षुरं दर्पणं वा केशच्छेदन कुर्वन् पूर्वाभिमुखं प्रेरयित्वा तुष्णिं वारद्वयं प्रेरयेत् । ततो लोहक्षुरेण कुशपत्रसहितेन तान् केशान् छित्त्वा गोमयपिण्डे निदधात् । दक्षिणपार्श्ववत् पश्चिमवामपार्श्वद्वयं पूर्ववत् कुर्यात् । ततः कुमारस्य शिरो हस्ताभ्यामालभ्य जपेत् । प्र (प्रजापति ऋषिः)। अनु (अनुष्टुप् छन्दः)। जमदग्निकस्य अगस्त्यदेवता ।

Folio No. 80 - त्र्यायुषजपे विनियोगः । **त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम् । यद्देवेषु त्र्यायुषं तन्नो अस्तु त्र्यायुषम् ।।**[३] इति जपेत् । ततोऽग्नेरुत्तरदेशं कुमारं नीत्वा स्वकुलसंप्रदायानुसारेण सशिखमशिखं वपनं कारयेत् । ततः कृशरस्थालिपाकव्रीह्यादिचत्वारिपात्राणि नापिताय दद्यात् । ततः सकेशं गोमयपिण्डमभिक्षिपेत् । ततो वंशविटपे स्थापयेत् । अथ कुमारो गन्धद्रव्येण स्नात्वा अहते वाससि[४] परिधाय गन्धादिकं गृहीत्वोपविशेत् । ततो ब्र-

Folio No. 81 - ह्मा प्रायश्चितार्थं[५] चतसृभिव्याहृतिभर्जुहूयात्[६] । पुनः कर्त्ता तिसृभिः हूत्वाग्नौ[७] समिधं दत्वा प्रक्षिप्य देवसवितरीति पर्युक्ष[८] अदितेऽनुमङ्कस्थेति उदकाञ्जलिभिः प्रसिञ्च्य दर्भजुटिकाहोमवसोर्द्धारां हूत्वा गोदक्षिणां दत्वा ब्रह्माग्निं विसृज्य जलशेषं निनीय पुनः पात्रमुदकेन पूरयित्वा सिलालतास्पृश्य[९] वामदेव्यं गीत्वा ब्राह्मणभोजनं दत्वा । विष्णुस्मरणम् । अछिद्रावधारणम्[१०] । मम पुत्रस्य चूडाकरणकर्म यत्कृतं तत्सुकृतमस्त्विति । आशिर्वादश्च ।

Folio No. 82 - इति चूडाकरणम् ।

---

१ -

२ - **केशच्छेवनं** इति स्यात् ।

३ - **य.वे. - ३.६२**

४ - **वाससी** इति स्यात् ।

५ - **प्रायश्चित्तार्थं** इति स्यात् ।

६ - **चतसृभिर्व्याहृतिभिर्जुहुयात्** इति स्यात्।

७ - **हुत्वाग्नौ** इति स्यात् ।

८ - **पर्युक्ष्य** इति स्यात् ।

९ - **सिलालतां संस्पृश्य** इति स्यात् ।

१० - **अच्छिद्रावधारणम्** इति स्यात् ।

दशमोऽध्यायः

उपनयनकर्मविधानम्

Folio No. 82 - अथोपनयनम् । गर्भाष्टमेऽष्टमे वर्षे कामनया आपस्तम्भोक्तकाले[1] ब्राह्मणमुपनयेत् । आपस्तम्भोक्तकाले[2] यथा । अथ काम्याः । सप्तमे ब्रह्मवर्च्चसकामम् । अष्टमे आयुष्कामम् । नवमे तेजष्कामम् । दशमेऽन्नादिकामम् । द्वादश्यैकादशे कामकामम् । त्रयोदशचतुर्दशपञ्चदशाषोडशवर्षेषु व्याहृति-होमात्मकप्रायश्चित[3]पूर्वकमुपनयेत् ।

Folio No. 83 - षोडशाद्वा ब्राह्मणस्य ततः कालो भवतीति गृह्यवचनात् । तत ऊर्द्ध्वं पतितसावित्रिको[4] भवति । षोडशवर्षात्परं ब्राह्मणस्योपनयनेऽधिकारो नास्ति । यस्मिन्नहनि उपनयनं भवति तत्र वैश्वदेवान्तं कर्म कृत्वा वेद्यां वरुणपूजां कुर्यात् । प्रातःकाले शान्तिमरिष्टवर्गं विप्रैः सह जपित्वा । संकल्पं कृत्वा । मातृपूजापूर्वकमाभ्युदयिकं श्राद्धं वसोर्द्धारामवोध्यादि सामजपं विवाहस्थ-लिखितप्रकारेण कृत्वा । स्वयमन्यदाचार्यपुरुषामाणवकं[5] पञ्चभिः -

---

१ - **आपस्तम्बोक्तकाले** इति स्यात् ।

२ - **आपस्तम्बोक्तकाले** इति स्यात् ।

३ - **प्रायश्चित्त** इति स्यात् ।

४ - **पतितसावित्रीको** इति स्यात् ।

५ - **स्वयमन्यदाचार्यपुरुषो माणवकं** इति स्यात् ।

Folio No. 84 - चतुर्भिस्त्रिभिर्ब्राह्मणैः सह हविष्यान्नं भोजयित्वा । स्वकुलानुसारेण सशिखमशिखवपनं कारयित्वा सुगन्धद्रव्येण स्नापयित्वा । वेद्यामानीय तुष्णिं कर्णवेधः । कुण्डलकङ्कणादिनालङ्कृत्याहतनवक्षोमषाणान्यतरवस्त्रेणासम्भवे शुक्लाहतकार्पासवस्त्रेण वा परिधाय[1] । **छन्दोगानां वस्त्रपरिधाने मन्त्रो नास्ति** । इति वचनात् मन्त्राभावे षाणवस्त्रपरिधापनम् । अथ कुशपवित्रकरं द्विराचमनं कारयित्वा आचार्य समीपं नयेत् । आगते माणवकेऽप्याचार्यः -

Folio No. 85 - प्रधानगृहस्य पूर्वदेशे गोमयेनोपलिप्य लक्षणमुल्लिक्ष्याभ्युक्ष्याग्नौ प्रणीय समुभवनामाग्निं संस्थाप्य समिधं दत्त्वा मम पुत्रस्यामुकशर्मणो माणवकस्योपनयनाङ्गहोमकर्मणि कृताकृतावेक्षकत्वेन ब्राह्मणं त्वामहं वृणे । ब्रह्मा वृतोऽस्मि । युक्त्वा[2]ऽग्नेरुत्तरतः प्रभृति दक्षिणावर्त्तेन दक्षिणं गत्वा । प्रत्यङ्मुखोऽवस्थाय पूर्वाग्रं वारिधारां दत्वा तदुपरि ब्रह्मासने प्रागग्रकुशानास्तीर्य पूर्ववत् ऋष्यादिकं स्मृत्वा । **निरस्तपरावसु**रित्यनेन वामहस्त्यङ्गुष्ठकनिष्ठाभ्यां तस्मात्कुश-

Folio No. 86 - मेकं गृहीत्वा नैर्ऋत्यादि दिशि निरस्य उपसृत्यासनमभ्युक्ष[3] वसोः सदने सीदामीत्युपविशेत् । ततः आचार्योऽग्नेरुत्तरतः प्राक्संस्थं द्रव्यासादनम् । उदकम् । परिस्तरणार्थं वर्हि । विंशतीध्म । स्रुव । आज्यम् । समिद्द्वयम् । कुशाः । अक्षताः । सम्मार्जनकुशाः । मेखला । अजिनम् । उपवीतम् । पलाशदण्डम् । कुशवटुद्वयम् । भिक्षापात्रम् । प्रणिता च । पूर्ववत् । प्रणिताजलेन प्रोक्षणम् । एतानासाद्य । उदगग्रकुशासनोपविष्टे माणवके ऋष्यादिपूर्वकं कृत्वा-

---

१ - **परिधाप्य** इति स्यात् ।

२ - **इत्युक्त्वा** इति स्यात् ।

३ - **उपसृत्यासनमभ्युक्ष्य** इति स्यात् ।

Folio No. 87 - भूजप[1] । परिसमूहन[2] । परिस्तरण[3] । इध्मदान[4] । पवित्रकरण[5] । पवित्रमार्जन[6] । आज्यसंस्कार[7] । स्रुवसम्मार्जन[8] । प्रतपन[9] । स्थापन[10] । उदकाञ्जलिसेक[11] । पर्युक्षण[12] । विरुपाक्षजप[13] । समित्प्रक्षेपश्च । व्याहृतिचतुष्टयं हूत्वा[14] । पुण्याहवाचनं कुर्यात् । ॐ प्र (प्रजापति ऋषिः) । यजु[15] (याजुषी छन्दः) । अग्नि (अग्निर्देवता) । उपनयनहोमे विनियोगः । **अग्ने व्रतपते व्रतं चरिष्यामि[16] सावित्रीव्रतं तत्ते प्रव्रवीमि । तत्सकेयं तेनसमिदमहमनृतात्सत्यमुपैमि स्वाहा ।।** इदमग्नये । प्र (प्रजापति ऋषिः) । य (यवमध्या छन्दः) । वायु[17] (वायुर्देवता) । उपनयनहोमे (विनियेगः) । **वायो-**

Folio No. 88 - र्व्रतपते व्रतं चरिष्यामि सावित्रव्रतं तत्ते प्रव्रवीमि । तत्सकेयं तेन तत्सकेयं तेनसमिदमहमनृतात्सत्यमुपैमि स्वाहा ।। इदं वायवे । प्र (प्रजापति ऋषिः) । य (यवमध्या छन्दः) । सूर्यो (सूर्यो देवता) । उपनयनहोमे (विनियेगः) । **ॐ सूर्यव्रतपते व्रतं चरिष्यामि सावित्रव्रतं तत्ते प्रव्रवीमि । तत्सकेयं तेन तत्सकेयं तेनसमिदमहमनृतात्सत्यमुपैमि स्वाहा ।।** इदं सूर्याय । प्र (प्रजापति ऋषिः) । य (यवमध्या छन्दः) । चन्द्रो (चन्द्रो देवता) । उपनयन (होमे विनियोगः) । **ॐ चन्द्रव्रतपते व्रतं चरिष्यामि सावित्रव्रतं तत्ते प्रव्रवीमि । तत्सकेयं तेन तत्सकेयं तेनसमिदमहमनृतात्सत्यमुपैमि स्वाहा ।।** इदं चन्द्राय । प्र (प्रजापति ऋषिः) । य (यवमध्या छन्दः) । इन्द्रो (इन्द्रो देवता) ।

---

१ - **भूजपः** इति स्यात् ।
२ - **परिसमूहनम्** इति स्यात् ।
३ - **परिस्तरणम्** इति स्यात् ।
४ - **इध्मदानम्** इति स्यात् ।
५ - **पवित्रकरणम्** इति स्यात् ।
६ - **पवित्रमार्जनम्** इति स्यात् ।
७ - **आज्यसंस्कारः** इति स्यात् ।
८ - **स्रुवसम्मार्जनम्** इति स्यात् ।
९ - **प्रतपनम्** इति स्यात् ।
१० - **संस्थापनम्** इति स्यात् ।
११ - **उदकाञ्जलिसेकः** इति स्यात् ।
१२ - **पर्युक्षणम्** इति स्यात् ।
१३ - विरुपाक्षजपः इति स्यात् ।
१४ - **हुत्वा** इति स्यात् ।
१५ - **याजु** इति स्यात् ।
१६ - **य.वे. - १.५, २.२८**
१७ - **वायुः** इति स्यात् ।

Folio No. 89 - उपनयनहोमे (विनियोगः)। **व्रतानां व्रतपते व्रतं चरिष्यामि सावित्रं व्रतं तत्ते प्रब्रवीमि । तत्सकेयं तेन तत्सकेयं तेनसमिदमहमनृतात्सत्यमुपैमि स्वाहा ।।** इदमिन्द्राय । एवं पञ्चाहुतिं दत्वा स्वासनात्पश्चिमप्रदेशे चोत्तराग्रान् कुशानास्तीर्य तेषु कुशेषु पूर्वाभिमुखो भूत्वा ऊद्ध्वं तिष्ठेत् । ततोऽग्न्याचार्ययोर्मध्ये उदगग्रेषु कुशेषु माणवक उत्तानहस्ताञ्जलिं कृत्वा पश्चिमाभिमुखो भूत्वा भूयोद्ध्वंस्तिष्ठेत् । माणवकस्य दक्षिणप्रदेशे स्थितो मन्त्रयुक्तो ब्राह्मणो माणवकस्याञ्जलिं -

Folio No. 90 - पूरयित्वा तदुपरिस्थितमाचार्याञ्जलिं पूरयेत् । गृहीतो-दकाञ्जलिमाचार्यो माणवकं पश्यन् जपेत् । प्र (प्रजापति ऋषिः)। अनु (अनुष्टुप् छन्दः)। अग्निवायुसूर्यचन्द्रेन्द्रदेवताः । आचार्यस्य माणवकप्रेक्षजपे विनियोगः । **आगत्रात्समन्महिपशुमत्यं युयोतन अरिष्टः सञ्चरेत् महि स्वस्ति चरणद्वयं अग्निस्ते स्तमग्रहीत् सविताहस्तमग्रहीत् अर्यमाहस्तमग्रहीत् मित्रस्त्वसमिकर्मणाग्निराचार्यस्तव** इति जपेदाचार्यः । प्र (प्रजापति ऋषिः)। अनु (अनुष्टुप् छन्दः)। आचार्यो (आचार्यो देवता)। माणवकस्य वचने विनियोगः । **दर्यमा हस्तमग्रहिन्मित्रस्त्व समिकर्मणाग्निराचार्यस्तव ।** इति जपेदाचार्यः । प्र (प्रजापति ऋषिः)। अनु (अनुष्टुप् छन्दः)। आचार्यो (आचार्यो देवता)। माणवकस्य वाचने विनियोगः ।

Folio No. 91 - ब्रह्मचर्यमागामिति माणवकं वाचयेत् । पुनराचार्यः । प्र (प्रजापति ऋषिः)। यजु[१] (याजुषी छन्दः)। माणवको देवता । माणवकस्य नामधेयप्रश्ने विनियोगः । को नामासीति माणवकं विष्णुशर्मन्निति मनसा संकल्पनामधेयं माणवकं पृच्छेत् । माणवकः । प्र (प्रजापति ऋषिः)। य (यवमध्या छन्दः)। माणवको (माणवको देवता)। नामधेयकथने विनियोगः । अमुकशर्मास्मीति नाम कथयेत् । तत आचार्यमाणवकौ गृहीतजलाञ्जलिं त्यजेत् । दक्षिणहस्तेन माणवकस्य दक्षिणहस्ताङ्गुष्ठं गृहीत्वा । प्र (प्रजापति ऋषिः)। यजु[२] (याजुषी छन्दः)। सवित्राश्विपूषणो -

---

१ - **याजु** इति स्यात् ।
२ - **याजु** इति स्यात् ।

Folio No. 92 - देवता । आचार्यस्य माणवकहस्तग्रहणे विनियोगः । ॐ **देवस्य ते सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां हस्तं गृह्णामि ।** विष्णुशर्मन् । अनेन मन्त्रेण माणवकस्याङ्गुष्ठसहितं दक्षिणहस्तं गृह्णीयात् । पुनराचार्यः । प्र (प्रजापति ऋषिः)। य (यवमध्या छन्दः)। सूर्यो । माणवकस्यावर्त्तने विनियोगः । सूर्यस्यावृत्तमन्वावर्त्तस्व । विष्णुशर्मन् । इति मन्त्रेण तद्देशस्थमेव माणवकं पूर्वाभिमुखं कुर्यात् । आचार्यो दक्षिणहस्तेन माणवकस्य दक्षिणस्कन्धं नाभिस्पृष्ट्वा[1] । प्र (प्रजापति ऋषिः)। य (यवमध्या छन्दः)। नाभिदे-

Folio No. 93 - वता । नाभिस्पर्शने विनियोगः । **प्राणानां ग्रन्थिरसि माविस्रसोऽतो क इदं ते परिददामि ।** विष्णुशर्माणम् । इति मन्त्रेण माणवकस्याव्यवहितां नाभिं स्पृशेत् । प्र (प्रजापति ऋषिः)। य (यवमध्या छन्दः)। अदूरो देवता । नाभेरुपरिस्थभागस्पर्शने विनियोगः । **अदूरो इदं ते परिददामि ।** विष्णुशर्माणम् । इति मन्त्रेण नाभेरूद्ध्र्वं हृदयाधः[2] स्पृशेत् । पुनः । प्र (प्रजापति ऋषिः)। कृशनो देवता । हृदयोपरिस्पर्शने विनियोगः । **कृशन इदं ते परिददामि ।** विष्णुशर्माणम् । इति मन्त्रेण हृदयादूद्ध्र्वं कण्ठादधश्च स्पृशेत् ।

Folio No. 94 - दक्षिणहस्तेन माणवकस्य दक्षिणस्कन्धमारभ्य । प्र (प्रजापति ऋषिः)। य (यवमध्या छन्दः)। प्रजा (प्रजापतिर्देवता)। माणवकस्य दक्षिणस्कन्धस्पर्शने । **ॐ प्रजापतये त्वा परिददामि । विष्णुशर्माणम् ।** इति मन्त्रं जपेत् । वामहस्तेन माणवकस्य वामस्कन्धं स्पृशन् । प्र (प्रजापति ऋषिः)। य (यवमध्या छन्दः)। सविता (सविता देवता)। वामस्कन्धस्पर्शने विनियोगः । **देवाय त्वा सवित्रे परिददामि ।** विष्णुशर्मन् । इति जपेत् । पिता पञ्चप्रैषेषु प्राकृतवचनेन माणवकं सम्बोधयति । वाढमिति माणवकः । प्र (प्रजापति ऋषिः)। य (यवमध्या छन्दः)। ब्रह्मचारी देवता । ब्रह्मचारीसम्बोधने विनियोगः ।

---

१ - **नाभिं स्पृष्ट्वा** इति स्यात् ।

२ - **हृदयादधः** इति स्यात् ।

Folio No. 95 - ब्रह्मचार्यसि विष्णुशर्मन् । इति सम्बोधयेत् । ततः प्र (प्रजापति ऋषिः) । य (यवमध्या छन्दः) । ब्रह्मचारी देवता । प्रैषे विनियोगः । समिधमाधेहीत्याचार्यः । वाढमिति माणवकः । एवं सर्वत्र । अपोशानेत्याचार्यः । वाढम् । यद्विहितं कर्म कुरु । वाढम् । मा दिवा स्वाप्सिः । वाढम् । अग्नेरुत्तरतो गत्वा आचार्य उदगग्रेषु कुशेषु पूर्वाभिमुख उपविशेत् । आचार्यः पश्चिमे उपविश्य उदगग्रकुशासने भूमिपातितजानुराचार्याभिमुख उपविशेत् । तथैनं माणवकमाचार्यस्त्रिवृत्तां त्रिप्रद-

Folio No. 96 - क्षिणं मेखलां परिधायन् । प्रतिष्ठन् । मेखलापरिधाने माणवकवचने । **इयं दुरुक्ता परिवाधमाना वर्णं पवित्रं पुनतिम आगात् । प्राणापानाभ्यां वलभा हरति स्वसादेवी सुभगामेखलेयम् ।। ऋतस्य गोत्रतपस्यः परस्वीघ्नति रक्षः सहमाना अरातिः । सामसम तमभिपर्योहि भद्रेधर्त्तारस्तेमेखले मारिषम् ।।** इति मन्त्रद्वयं वाचयेत् । अथ शाखा प्रवरसस्मितां ग्रन्थिं कुर्यात् । तत आचार्यः । ॐ यज्ञोपवितमन्त्रस्य । परंब्रह्मऋषिः । यजु[1] । ब्रह्माग्निवायुनागसोमपितृ-

Folio No. 97 - प्रजापतिवरुणेन्द्रविश्वेदेवता । यज्ञोपवित[2]ग्रहणे विनियोगः । **ॐ यज्ञोपवित[3]मसि यज्ञस्य त्वोपवीतेनोपनहामि ।** इति मन्त्रेण माणवकं यज्ञोपवीतं ग्राहयेत् । अथ कृष्णाजिन[4] उत्तरीयम् । **मित्रस्य चक्षुद्ध्वरुणं बलीयस्तेजोयशस्यं स्थविरं समिद्धम् । आनाहनस्य वसनं जरिष्णु परितं वाज्वजिनं वधेहम् ।।** अनेनाजिनोत्तरीयं धारयेत् । सूतकारमर्चनम् । तुष्णिमेव देयमिति वचनात् । तुष्णिं कुशवटुद्वयं गृह्णाति माणवकः । माणवक उपविष्टयेत्[5] वा-

---

१ - **याजु** इति स्यात् ।
२ - **यज्ञोपवीत** इति स्यात् ।
३ - **यज्ञोपवीत** इति स्यात् ।
४ - **कृष्णाजिनम्** इति स्यात् ।
५ - **उपवेष्टयेत्** इति स्यात् ।

Folio No. 98 - चार्यसमीपं किञ्चिदनुसरति । माणवकः अमुकसगोत्रः श्रीमान् अमुकदेवशर्माहं भो अभिवादयामि । आचार्य अमुकशर्मा दीर्घायुर्भव । अधिहृद्भो साविर्त्रिं[१] मे भवाननुब्रवीतु । इति ब्रुवन् ब्रह्माकत्सपं कृत्वा उशनो भवति । तत आचार्यः प्रथमपादं पादं ततोऽर्द्धमर्द्धं ततः कृत्स्नां सावित्रिमध्यापयेत्[२] । ॐ गायत्र्याः । विश्वामित्र ऋषिः । गायत्री छन्दः । सविता देवता । अग्निमुखमुपनयने विनियोगः । गायत्री वा इदं सर्वभूत-

Folio No. 99 - मित्यादि ब्राह्मणम् । **ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमही । धीयो यो नः प्रचोदयात् ।।**[३] एवं पादं पादं वाचयित्वा । **ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमही । धीयो यो नः प्रचोदयात् ।।**[४] इति पाठयित्वा सर्वा ऋचं पाठयेत् । व्याहृतीनामध्यापनप्रकारो यथा । ॐ ॐकारस्य ब्रह्माऋषिः । गायत्री छन्दः । अग्निर्देवता । सर्वकर्मारम्भे विनियोगः । ॐ भूरित्यस्य । प्र (प्रजापति ऋषिः)। गायत्री (छन्दः)। अग्नि[५] । व्याहृतिपाठे (विनियोगः)। ॐ भूः । ॐ भूर्भुवेत्यस्य । उष्णिक् (छन्दः)। वायु[६] । व्याहृतिपा-

Folio No. 100 - ठे (विनियोगः)। ॐ भुवः । ॐ स्वरित्यस्य । प्र (प्रजापति ऋषिः)। अनु (अनुष्टुप् छन्दः)। सूर्यो (सूर्यो देवता)। व्याहृतिपाठे (विनियोगः)। ॐ स्वः । इति पाठयेत् । पलाशदण्डं शिरः पर्यन्तसम्मितं प्रयच्छन् । प्र (प्रजापति ऋषिः)। उष्णिक् (छन्दः)। दण्डो देवता । माणवकदण्डार्पणे (विनियोगः)। **ॐ सुश्रुवः सुश्रुवः संसा कुरु । यथा वंसुश्रवः सुश्रवादेवेष्वेवमहं सुश्रवः सुश्रवा ब्राहमणेषु भ्युयासम् ।** अनेन दण्डं गृह्णीयात् । अथाचार्यो ब्रह्मचारिणं प्रेष्यते । आचार्याधीनो भवान् उताधर्माचरणात् । वाढमिति माणवकः सर्वे प्रैषेषु ।

---

१ - **सावित्रीं** इति स्यात् ।

२ - **सावित्रीमध्यापयेत्** इति स्यात् ।

३ - य.वे. - ३६.३

४ - य.वे. - ३६.३

५ - **अग्निः इति स्यात् ।**

६ - **वायुः** इति स्यात् ।

Folio No. 101 - क्रोधानृते वर्जय । वाढम् । मैथुनं वर्जय । उपरिशय्या वर्जय । कौशीलवणगन्धाञ्जनानि वर्जय । स्नानं वर्जय । अवलेखनदन्तधावननखच्छेदनानि वर्जय । क्षुरकृत्यं वर्जय । मधुमांसे वर्जय । अन्तर्ग्राम उपानहोद्धारणं वर्जय । स्वयमिन्द्रियमोचनं वर्जय । वाढम् । इति । एते द्वादशप्रैषाः प्राकृतवचनेन माणवकं बोधनीयाः । अत्रावसरे ब्रह्मचारी भस्ममादाय[१] ललाटे ग्रीवायां हृदि **कश्यपस्ये**[२]ति मन्त्रेण तिलकं धा-

Folio No. 102 - रयेत् । प्र (प्रजापति ऋषिः)। य (यवमध्या छन्दः)। जमदग्नि । कश्यपास्त्वा देवता । त्र्यायुषजपे विनियोगः । **त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम् । यद्देवेषु त्र्यायुषं तन्नो अस्तु त्र्यायुषम् ।।**[3] अथ मेखलाधारणम् । भैक्षाचर्या[४]-दण्डधारण-समिधारण-समिधादानोदकस्पर्शन-प्रातरभिवाद[५] इत्येताः[६] नित्यधर्माः । एते प्रत्यहं यथा शास्त्रेण कर्त्तव्या । इति प्राकृतवचनेन माणवकं प्रबोधयेत् । ततो ब्रह्मा प्रायश्चितार्थं महाव्याहृतिचतुष्टयं जुहूयात्[७] ।

Folio No. 103 - आचार्यो व्याहृतितिसृभिर्हूत्वाग्नौ समिधं प्रक्षिप्य देवसवितरि पर्युक्ष्य । अतीतेऽनुमङ्कस्थेति उदकाञ्जलिसेकं कृत्वा । दर्भजुटिकाहोमम् । वसोर्द्धारां हूत्वा[८] । कृतैतदुपनयनकर्मणः सुप्रतिष्ठार्थं ब्राह्मणे[९] गां रूद्रदेवतां दक्षिणां तुभ्यमहं संप्रददे । अग्निविसर्जनम् । जलशेषं निनीय पुनः पात्रमुदकेन पूरयित्वा । वामदेव्यगानम् । अछिद्रावधारणम्[१०] । आशीर्वादश्च । **आदिमध्यावसानेषु भवशब्दोपलक्षिता । ब्राह्म-**

---

१ - **भस्म आदाय** इति स्यात् ।

२ - **त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम्। यद्देवेषु त्र्यायुषं तन्नो अस्तु त्र्यायुषम्।।** (य.वे. - ३.६२)

३ - य.वे. - ३.६२

४ - **भैक्षचर्या** इति स्यात् ।

५ - **प्रातरभिवादा** इति स्यात् ।

६ - **एते** इति स्यात् ।

७ - **जुहुयात्** इति स्यात् ।

८ - **हुत्वा** इति स्यात् ।

९ - **ब्रह्मणे** इति स्यात् ।

१० - **अच्छिद्रावधारणम्** इति स्यात् ।

Folio No. 104 - णाः क्षत्रियाः वैश्याः भिक्षाचर्या यथाकुलम् ।। अथ गृहीतदण्डो ब्रह्मचारी भिक्षां प्रार्थयेत् । प्राङ्मुखस्थ एवं भिक्षापात्रं गृहीत्वा प्रथमं मातरं भवती[1] भिक्षां देही[2] । इति प्रार्थयेत् । ततो माता उदकपूर्वं भिक्षां दत्वा पुनरुदकमिति । लब्धभिक्षः । स्वस्ति ब्रुयात् । भैक्ष्यं तु पक्वान्नमेव । एवं भगिनीम् । पितरम् भवान् भिक्षां देहीति प्रार्थयेत् । ततोऽन्यांश्च प्रार्थयेत् । प्राप्तं भैक्ष्यमाचार्याय निवेदयेत् । आचार्यस्तु यथाकालं भुंक्ष्वेति[3] ब्रुयात् ।

Folio No. 105 - भिक्षां मातरि समर्प्य ब्रह्मचारी यावद्दिनावसानं वाग्यतस्तिष्ठेत् । ततः प्राप्तां सन्ध्यामुपास्योपलिप्तायां भूमौ लक्षणमुलिख्याभ्युक्ष्य भूर्भुवस्स्वरित्य-भिमुखमग्निं प्रणीय समिधं दत्वा भूजपं कृत्वा । तुष्णिमग्न्यावायवान् कीं कृत्य उदकाञ्जलिसेकं कृत्वा पर्युक्ष[4] समिधं दत्वा । प्रादेशमात्रं घृताक्तसमित्त्रयमादाय आद्यत्रयोः[5] तुष्णिमध्यसमित् होमः । (प्रजापति ऋषिः)। य (यवमध्या छन्दः)। अग्नि[6] (अग्निर्देवता)। समिधादाने विनियोगः । **अग्नये समिधामाहार्षं बृहते जातवेदसे । यथा-**

Folio No. 106 - हमग्ने समिधासमिध्यस्थेवमहमायुष्य-मेध्यत्यवर्च्चसा प्रजया पशुभिः ब्रह्मवर्च्चसेन धनेनाद्येन समेधिसीय स्वाहा । इदमग्नये । इति हूत्वा[7] । समिधं दत्वा । देवसवितरीति पर्युक्ष्य अदितेऽनुमङ्कस्थेत्यादिरुदकाञ्जलिभिः सिक्त्वा प्रदक्षिणीकृत्य जलशेषं निनीय पुनः पात्रमुदकेन पूरयित्वा । वामदेव्यं गायेत् । **त्र्यायुषं जमदग्ने**[8]रिति भस्मतिलकं कुर्यात् । अथ सायं भोजनार्थं भिक्षा[9] भक्षयेत्[10] । तथा चाश्वलायनः । सायं प्रतर्भिक्षयेत्[11] । समिधमा-

Folio No. 107 - दधाति । उपनयनदिवसेन सह त्रिरात्रमक्षारलवणवणाशीभवेद्ध । इत्युपनयनसमाप्तम्[12] ।

---

१ - **भवति** इति स्यात् ।
२ - **देहि** इति स्यात् ।
३ - **भुङ्क्ष्वेति** इति स्यात् ।
४ - **पर्युक्ष्य** इति स्यात् ।
५ - **आद्ययोः** इति स्यात् ।
६- **अग्निः** इति स्यात् ।
७ - **हुत्वा** इति स्यात् ।
८ - **त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम्। यद्देवेषु त्र्यायुषं तन्नो अस्तु त्र्यायुषम्।।** (य.वे. - ३.६२)
९ - **भिक्षां** इति स्यात् ।
१० - भिक्षयेत् **इति स्यात् ।**
११ - **प्रातर्भिक्षयेत्** इति स्यात् ।
१२ - **उपनयनं समाप्तम्** इति स्यात् ।

एकादशोऽध्यायः
सावित्रचरुहोमकर्मविधानम्

Folio No. 107 - अथ चतुर्थेऽहनि सावित्रश्चरुः । ततः प्रातः स्नानादिकं कृत्वा वरुणपूजां कृत्वा लक्षणपूर्वकमग्निं प्रणीय अग्नेर्दक्षिणतो ब्रह्मासनं कृत्वाग्नेरुत्तरतो ब्राह्मणं[१] वृणीत । विष्णुरद्य इहेत्यादि । अमुकसगोत्रममुकवेदान्तर्गत अमुकशाखैकदेशाध्यायिनं अमुकदेवशर्माणे[२] ब्राह्मणमर्च्चतम्[३] । अमुकसगोत्रः श्रीमान् -

Folio No. 108 - अमुकदेवशर्माहं सावित्रचरुणा पक्षे तत्र त्वं ब्रह्मा भव । भवामीत्युक्त्वा पूर्वेणाग्निं परिक्रम्य दक्षिणं गत्वा स्वासने उदङ्मुखो दर्भानास्तीर्य वीरिधारां दत्वा पूर्ववत् ऋष्यादिकं व्रुत्वा ब्रह्माणमुपविशेत् । पश्चादग्ने विनियोगक्रमेण यथा सम्भवं प्रक्षालितानामुल्लुखलादिनामासादयेत् । सहविः कंसः सूर्यः उलुखलमूषल[४] । आज्यस्थाली । चरुस्थाली । पवित्रोदक[५] । मेक्षणोदकानि । बर्हि[६] । ईध्म[७] । स्रुव[८] । आज्य[९] । समिद्द्वयम् । कुशाः । अक्षताः ।

---

१ - **ब्रह्माणं** इति स्यात् ।
२ - **अमुकदेवशर्मानं** इति स्यात् ।
३ - **ब्राह्मणमर्च्चितम्** इति स्यात् ।
४ - **उलुखलमूषले** इति स्यात् ।
५ - **पवित्रोदकम्** इति स्यात् ।
६ - **बर्हिः** इति स्यात् ।
७ - **इध्मम्** इति स्यात् ।
८ - **स्रुवः** इति स्यात् ।
९ - **आज्यम्** इति स्यात् ।

Folio No. 109 - सम्मार्गकुशं स्रुचां प्राङ्मासादनम् । **कंसेन सूर्पाद्धविर्गृहीत्त्वा पवित्रेत्वाजुष्टं निर्वपामि** । इत्युखले[1] प्रक्षिप्य । द्विस्तुष्णिं दक्षिणोत्तरभ्यां पाणिभ्यां मूषलं गृहीत्वा प्राङ्मुखोऽवहति[2] । अवहत्य उलुखलाद्वहिस्कृत्य सूर्पेण विस्फोटयेत् । इत्थमेव वारत्रयं कृत्वा त्रिः प्रक्षाल्य चरुस्थाल्यामुत्तराग्रं पवित्रं प्रक्षिप्य तत्र प्रक्षालिततण्डुलान् निक्षिप्य जलं पूरयित्वाऽधिश्रित्य मेक्षणेन प्रदक्षिणं चालयेन् घृतमभिघार्य उदगुद्वास्यप्रत्यभिघार्य आज्यरुत्तरतस्थापयित्वा पूर्ववत् -

Folio No. 110 - ऋष्यादिकं कृत्वा भूजप[3] । परिसमूहन[4] । परिस्तरण[5] । इध्मदान[6] । पवित्रकरण[7] । पवित्रमार्जन[8] । आज्यसंस्कार[9] । स्रुवस्रुचसम्मार्जन[10] । प्रतपन[11] । स्थापन[12] । उदकाञ्जलिसेक[13] । पर्युक्षण[14] । विरुपाक्षजप[15] । समित्प्रक्षेपश्च । ततः स्रुचि स्रुवेणचतुष्टयं गृहीत्वा । पुण्याहवाचनम् । अग्नये स्वाहेति दक्षिणतो उत्तरतो हूत्वा । पुनः स्रुचि चतुर्गृहीत्वा सोमाय स्वाहेत्युत्तरतो हूत्वा[16] इदं सोमाय इति त्यागः । यस्य प्रवरे भृगु प्रविशति स्रुवपञ्चकं गृहीत्वा आज्यभागौ होतव्यौ । पुण्याह-

१ - **इत्युलुखले** इति स्यात् ।
२ - **प्राङ्मुखोऽवहन्ति** इति स्यात् ।
३ - **भूजपः** इति स्यात् ।
४ - **परिसमूहनम्** इति स्यात् ।
५ - **परिस्तरणम्** इति स्यात् ।
६ - **इध्मदानम्** इति स्यात् ।
७ - **पवित्रकरणम्** इति स्यात् ।
८ - **पवित्रमार्जनम्** इति स्यात् ।
९ - **आज्यसंस्कारः** इति स्यात् ।
१० - **स्रुवस्रुचसम्मार्जनम्** इति स्यात् ।
११ - **प्रतपनम्** इति स्यात् ।
१२ - **संस्थापनम्** इति स्यात् ।
१३ - **उदकाञ्जलिसेकः** इति स्यात् ।
१४ - **पर्युक्षणम्** इति स्यात् ।
१५ - विरुपाक्षजपः इति स्यात् ।
१६ - **हुत्वा** इति स्यात् ।

Folio No. 111 - वाचनम् । मम पुत्रस्य सावित्रश्चरुहोमकर्मारम्भः क्रियते यदेत्यादि । ततः स्रुचिस्रुवेणाज्यं गृहीत्वा मेक्षणेन हविष्येर्मन्त्रे पूर्वार्द्धाद्वारद्वयं गृहीत्वा स्रुवेण पुनराज्येनाभिघार्य **ॐ सवित्रे स्वाहेति मन्त्रे** जुहूयात्[१] । इदं सवित्रे इति त्यागः । ततः स्रुवेणाज्यं गृहीत्वा । ॐ प्र (प्रजापति ऋषिः)। यजु[२] (याजुषी छन्दः)। अग्नि[३] (अग्निर्देवता)। आज्यहोमे विनियोगः । **अग्ने व्रतपते व्रतं चरिष्यामि[४] । तत्सकेयं तेनसमिदमहमनृतात्सत्यमुपैमि स्वाहा ।।** इदमग्नये । प्र (प्रजापति ऋषिः)। य (यवमध्या छन्दः)। वायुर्देवता ।

Folio No. 112 - होमे विनियोगः । **ॐ वायोर्व्रतपते व्रतं चरिष्यामि । तत्सकेयं तेनसमिदमहमनृतात्सत्यमुपैमि स्वाहा ।।** इदं वायवे । प्र (प्रजापति ऋषिः)। य (यवमध्या छन्दः)। सूर्यो (सूर्यो देवता) । होमे विनियोगः । **ॐ सूर्यव्रतपते व्रतं चरिष्यामि । तत्सकेयं तेनसमिदमहमनृतात्सत्यमुपैमि स्वाहा ।।** इदं सूर्याय । प्र (प्रजापति ऋषिः)। य (यवमध्या छन्दः)। चन्द्रो (चन्द्रो देवता)। होमे (विनियोगः)। **ॐ चन्द्रव्रतपते व्रतं चरिष्यामि । तत्सकेयं तेनसमिदमहमनृतात्सत्यमुपैमि स्वाहा ।।** इदं चन्द्राय । प्र (प्रजापति ऋषिः)। य (यवमध्या छन्दः)। इन्द्रो (इन्द्रो देवता)। होमे (विनियोगः)। **ॐ व्रतानां व्रतपते -**

---

१ - **जुहुयात्** इति स्यात् ।
२ - याजु इति स्यात् ।
३ - **जुहुयात्** इति स्यात् ।
४ - य.वे. - १.५, २.२८
५ - **हुत्वा** इति स्यात् ।
६ - **मेक्षणेनोत्तरपूर्वार्द्धाद्भूयिष्ठं** इति स्यात् ।
७ - **हुत्वा** इति स्यात् ।
८ - **हुत्वा** इति स्यात् ।
९ - **जुहुयात्** इति स्यात् ।

Folio No. 113 - व्रतं चरिष्यामि । तत्सकेयं तेनसमिदमहमनृतात्सत्यमुपैमि स्वाहा ।। इदं इन्द्राय । ब्रह्मा महाव्याहृतिभिराज्याहुतिचतुष्टयं हूत्वा[१] चरुस्थाल्यामाज्येनोपस्तीर्य मेक्षणेनोत्तरपूवार्द्धा भूयिष्ठं[२] गृहीत्वा घृतेन द्विरभिघार्य । **ॐ अग्नये स्विष्टकृते स्वाहा । इदमग्नये स्विष्टकृते ।** इति स्विष्टकृतं हूत्वा[३] तिसृभिर्व्याहृतिभिर्हूत्वा[४] ब्रह्मातिसृभिर्जुहूयात्[५] । मेक्षणमग्नौ प्रक्षिप्य समिधं दत्वा देवसवितरीत्यादिभिश्चतसृभिः पर्युक्ष्यासृतकुशान् गृहीत्वा ।

Folio No. 114 - प्र (प्रजापति ऋषिः)। य (यवमध्या छन्दः)। वायु[६] (वायुर्देवता) । दर्भतृणाभ्यञ्जने । **अक्तं रिहाणाज्यन्तु वयः ।** अनेन वारत्रयपठितेन घृतेनाभ्यञ्जनम् । प्र (प्रजापति ऋषिः)। य (यवमध्या छन्दः)। रूद्रो (रूद्रो देवता)। दर्भजुटिकाहोमे । यः पशूनामिति दर्भजुटिकां हूत्वा[७] । वसोर्द्धाराहोमः । अग्निप्रदक्षिणकृत्वा[८] दशपरिमितब्राह्मणभोजनम् । ब्रह्मणे हविःशेषदक्षिणां दत्वा । अग्निविसर्जनम् । उदकशेषं निनीय पुनः पात्रमुदके पूरयित्वा । वामदेवं गीत्वा । अछिद्रावधार्य[९] । विष्णुस्मरणम् । ब्राह्मणैराशीर्वादं कारयेत् ।

Folio No. 115 - इति सावित्रश्चरुहोमः समाप्तः ।

---

१ - **हुत्वा** इति स्यात् ।

२ - **मेक्षणेनोत्तरपूर्वार्द्धाद्भूयिष्ठं** इति स्यात् ।

३ - **हुत्वा** इति स्यात् ।

४ - **हुत्वा** इति स्यात् ।

५ - **जुहुयात्** इति स्यात् ।

६ - **वायुः** इति स्यात् ।

७ - **हुत्वा** इति स्यात् ।

८ - **अग्निप्रदक्षिणं कृत्वा** इति स्यात् ।

९ - **अच्छिद्रमवधार्य** इति स्यात् ।

द्वादशोऽध्यायः
वेदारम्भकर्मविधानम्

Folio No. 115 - अथ वेदारम्भः । केषांचिन्मते उपनयनदिवसे सावित्रीं प्रदानकर्मानन्तरं वेदारम्भः । तत्र प्रयोगो लिख्यते । वेदारम्भे सर्वं कर्माचार्यस्य । प्रथमतो वरुणपूजा । संकल्पः । मातृपूजा । वसोर्द्धारा । आभ्युदयिकश्राद्धम् । ततो पञ्चभूसंस्कारेण लक्षणपूर्वकसमुद्भवनामाग्निं प्रणीय । समिधं दत्वा । ब्रह्मोपवेशनम् । पात्रासादनम् । भूजप[१] । परिसमूहन[२] । परिस्तरण[३] ।

Folio No. 116 - इध्मदान[४] । पवित्रकरण[५] । पवित्रमार्जनम्[६] । आज्यसंस्कार[७] । स्रुवसम्मार्जन[८] । प्रतपन[९] । स्थापन[१०] । उदकाञ्जलिसेक[११] । पर्युक्षण[१२] । विरुपाक्षजप[१३] । समित्प्रक्षेपश्च । महाव्याहृतिहोमं कृत्वा । पुण्याहवाचनं कुर्यात् । ऋष्यापूर्वकम् उपनयनक्रमेणाध्यापयेत् । तद्यथा ॐ गायत्र्याः विश्वामित्र[१४] ऋषिः । गायत्री छन्दः । सविता देवता । अग्निर्मुखमुपनयने विनियोगः । **गायत्री वा इदं सर्वभूतमि**त्यादि ब्राह्मणम् । **ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमही । धीयो यो नः प्रचोदयात् ।।**[१५] एवं पादं -

---

१ - **भूजपः** इति स्यात् ।
२ - **परिसमूहनम्** इति स्यात् ।
३ - **परिस्तरणम्** इति स्यात् ।
४ - **इध्मदानम्** इति स्यात् ।
५ - **पवित्रकरणम्** इति स्यात् ।
६ - **पवित्रमार्जनम्** इति स्यात् ।
७ - **आज्यसंस्कारः** इति स्यात् ।
८ - **स्रुवसम्मार्जनम्** इति स्यात् ।
९ - **प्रतपनम्** इति स्यात् ।
१० - **संस्थापनम्** इति स्यात् ।
११ - **उदकाञ्जलिसेकः** इति स्यात् ।
१२ - **पर्युक्षणम्** इति स्यात् ।
१३ - विरुपाक्षजपः इति स्यात् ।
१४ - **विश्वामित्रः** इति स्यात् ।
१५ - य.वे. - ३६.३

Folio No. 117 - पादं वाचयित्वा । **ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धीयो यो नः प्रचोदयात् ।**।[1] इति पाठयित्वा सर्वा ऋच पाठयेत् । व्याहृतीनां अध्यापनप्रकारो यथा । ॐ ॐकारस्य ब्रह्मा ऋषिः । गायत्री छन्दः । अग्निर्देवता । सर्वकर्मारम्भे विनियोगः । ॐ ॐ भूरित्यस्य । प्र (प्रजापति ऋषिः)। गायत्री (गायत्री छन्दः)। अग्निव्याहृतिपाठे । ॐ भूः । ॐ भुवरित्यस्य । प्र (प्रजापति ऋषिः)। उष्णिक् (उष्णिक् छन्दः)। वायु (वायुर्देवता)। व्याहृति (पाठे विनियोगः)। ॐ भुवः । ॐ स्वरित्यस्य । प्र (प्रजापति ऋषिः)। अनु (अनुष्ठुप् छन्दः)। सूर्यो (सूर्यो देवता)। व्याहृतिपाठे (विनियोगः)। ॐ स्वः । ॐ भूर्भुवस्स्वः । **ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धीयो यो नः -**

Folio No. 118 - प्रचोदयात् ।।[2] **ॐ तत्सवितुर्वरेणीयो व । भर्गो दोवस्य धी महि का । धीयो यो नः प्र तषा । हिं कषा नदायोक । आ ँ॒ कु ।** अभिप्रेतार्थसिद्ध्यर्थमिति मन्त्रेण विघ्नेशार्थं नारिकेलभग्नम्[3] । ततो ब्रह्मचारिणे वेदमध्यापयति । **सो मंरा जा नं वरुणां तो अग्निमन्वा रभां महे चौ । होवे हा इकः षां दित्यविष्णुंसू यँ छु । होवा हा इकः । ब्रह्मानुणा ञ्चा ति । होवा हा इकः । वृहाट उदा खु । पातिटु ते ।**

Folio No. 119 - ॐ नमः सामवेदाय । अग्न इति आ या हि वोइता या इतगु । तोया इका । गृणा नो त्वंका । त्व दातोया इतो । तोया इका । नाइहो तासा धी । छा इवाऔ हो वा वो । उ । अग्न आया हि विते तया इक । गृणा नो हत्वदा ता या इकः । निहोः ता सच्छिवर्हा ईषिधै । विर्हा ईषा औ होवावे । वर्हिषिः जि । अग्न आ या हि तु । दा इतया इति । गृणा नो हवदाता येपै । निहोता साणे ।

---

१ - य.वे. - ३६.३

२ - य.वे. - ३६.३

३ - **नारिकेलभञ्जनम्** इति स्यात् ।

Folio No. 120 - छा इवा वि हा इगोज्ञ हा इकू । भू हमग्नेः यज्ञं सतु । हमग्ना इति । ॐ नमः सामवेदाय । ततो ब्रह्मा महाव्याहृतिचतसृभिर्हूत्वा[1] कर्त्ता तिसृभिर्हूत्वा[2]ऽग्नौ समिधं दत्वा आदितेऽनुमङ्कस्थेति उदकाञ्जलिं कृत्वा देवसवितरि पर्युक्ष । दर्भजुटिकाहोमम् । वसोर्द्धारां हूत्वा[3] अग्नि[4] प्रदक्षिणीकृत्य दशब्राह्मणभोजनम् । विष्णुस्मरणम् । ब्रह्माग्निविसर्जनम् । उदकशेषं निनीय पुनः पात्रमुदकेन पूरयित्वा ।

Folio No. 121 - वामदेवं गीत्वा । अछिद्रावधार्य[5] ब्राह्मणैराशीर्वादम् कारयेत् । इति वेदारम्भः ।

---

१ - **हुत्वा** इति स्यात् ।

२ - **हुत्वा** इति स्यात् ।

३ - **हुत्वा** इति स्यात् ।

४ - **अग्निं** इति स्यात् ।

५ - **अच्छिद्रमवधार्य** इति स्यात् ।

त्रयोदशोऽध्यायः
समावर्त्तनकर्मविधानम्

Folio No. 121 - अथ समावर्त्तनम् । यदा व्रतानन्तरं क्रियते तदा सावित्रे वेदारम्भसमाप्ते तस्मिन्नेव दिवसे यथासम्भवं पूर्वोक्तकल्पेन । वरुणपूजा । संकल्पः । मातृपूजा । वसोर्द्धारा । आभ्युदयिकश्राद्धं[१] कुर्यात् । स्वगृहस्य पूर्वस्या[२] दिश्युत्तरस्यां वा सर्वत्र आवृत्ते चोपलिप्ते देशे पूर्वाग्रे स्वासनयोगेषूत्तराभिनुख आचार्य उपविशेत् । उदङ्मुखो ब्रह्मचार्युत्तराग्रेषु कुशेषूपविशेत् ।

Folio No. 122 - ततो ब्रह्मचारी ताम्रादिपात्रेषु ब्रीहिं, शाली[३], तिल[४], मुञ्च[५], गोधूम[६], सर्षप[७], यवचन्दनादिगन्धद्रव्ययुक्तमुष्णोदकं शीतोदकमिश्रितं पूरयित्वा तेनोदकेन स्वाञ्जलिं प्रपूर्य । प्र (प्रजापति ऋषिः)। य (यवमध्या छन्दः)। अग्नि[८] (अग्निर्देवता)। समावर्त्तने उदकाञ्जलित्यागे विनियोगः । ये अप्स्वन्तरग्नयः प्रविष्ठा गोभि उपगोद्धोमग्नौ कामनोहा । खलोविरुजः स्तनुदुषिरिन्द्रियत्वा अतीतांसृजामि । अनेनाञ्जलिं भूमौ पातयेत् । ततः पुनरपि तथैवाञ्जलिं गृहीत्वा । प्र (प्रजापति ऋषिः)। य (यवमध्या छन्दः)। आपो (आपो देवता)। जलाञ्जलित्यागे विनियोगः । यदपां घो-

---

१ - **आभ्युदयिकश्राद्धमिति** इति स्यात् ।
२ - पूर्वस्यां इति स्यात् ।
३ - शालीं इति स्यात् ।
४ - तिलं इति स्यात् ।
५ - मुद्गं इति स्यात् ।
६ - गोधूमं इति स्यात् ।
७ - सर्षपं इति स्यात् ।
८ - अग्निः इति स्यात् ।

Folio No. 123 - रजपां कृत्स्नं यदपापशान्तमतितत्सृजामि । अनेन द्वितीयाञ्जलिं त्यजेत् । पुनरुदकाञ्जलिं गृहीत्वा । प्र (प्रजापति ऋषिः)। य (यवमध्या छन्दः)। रोचनोऽग्निर्देवता । आत्माभिषेके विनियोगः । यो रोचनस्तमिह गृह्णामि तेनाहं मामभिसिञ्चामि । अनेन तृतीयाञ्जलिं स्वमूर्ध्न्यभिसिञ्चेत् । प्र (प्रजापति ऋषिः)। य (यवमध्या छन्दः)। रोचनोऽग्निर्देवता । आत्माभिषेके विनियोगः । **ॐ यशसे तेजसे ब्रह्मवर्च्चसाय वलायेन्द्रियाय वीर्यायान्नाद्यायरायस्पोषाय हित्वा अपचित्यै ।** अनेन चतुर्थाञ्जलिं शिरस्यभिसिञ्चेत् । पुनः -

Folio No. 124 - प्र (प्रजापति ऋषिः)। महापङ्क्ति (छन्दः)। अश्विनौ (देवता)। आत्माभिषेके (विनियोगः)। येन स्त्वमकृण्वन्त्तं येनापामृषन्त्तं सुराम् । येनाख्यामभ्युसिञ्चन्त्तं तेनेमां पृथिवीं महीम् । यद्यन्तदश्विनायशस्तेन ममाभिसिञ्चन्त्तम् । अनेन पञ्चमाञ्जलिं सिञ्चेत् । तुष्णिं षष्ठाञ्जलिं शिरसि निक्षिप्य उत्थायादित्याभिमुखो ब्रह्मचारी चतुर्भिर्मन्त्रैरादित्यमुपतिष्ठेत् । प्र (प्रजापति ऋषिः)। अनु (अनुष्ठुप् छन्दः)। आदित्यो (देवता)। आदित्योपस्थाने विनियोगः । ॐ भवन्भ्राजत्भृष्टिभिरिन्द्रो मरुद्भिरस्थात् । दशशनिरसिदशशनि माकृत्वा विशाम्यामाविश । चक्षुरसि चक्षुष्ट्व-

Folio No. 125 - मस्य वमे पाप्मानं जहि सोम स्त्वा राजादतु नमस्ते अस्तु मा माहींसि । प्र (प्रजापति ऋषिः)। अनु (अनुष्ठुप् छन्दः)। आदित्यो देवता । आदित्योपस्थाने । ॐ उद्यन्तात्भ्राजभृष्टिभिरिन्द्रो मरुद्भिरस्थ्यात्सान्तपनेभिरस्तात् । शतशनिरसिशतशनि म्मा कुर्वाहा विशाम्याविश । चक्षुरसि चक्षुष्ट्वमस्यवमे पाप्मानं जहि सोमस्त्वा राजावतु नमस्तेऽस्तु मा माहींसि । प्र (प्रजापति ऋषिः)। अनु (अनुष्ठुप् छन्दः)। आदित्यो (देवता)। आदित्योपस्थाने । **ॐ उद्यन् भ्रवन्भृष्टिभिरिन्द्रो मरुतरस्थोत्सायं यावद्भिरस्थात् । सहस्त्रशनिरसि सहस्त्रशनि म्मा कु-**

Folio No. 126 - र्वाहाविशाम्या माविश । चक्षुरसि चक्षुष्ट्वमस्यवमे पाप्मानं जहिसोमस्त्वा राजावतु नमस्तेऽस्तु मा माहींसि ।। एवंमादित्याभिमुख पठेत् । ततः ब्रह्मचारी । ॐ शुनःसेफ ऋषिः । अनु (अनुष्ठुप् छन्दः)। वरुणो (देवता)। मेखलामोयने विनियोगः । **ॐ उदूत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं**

श्रथाय । अधा दित्यवयमा व्रते तवानागसो अदितये स्याम ।।[१] अनेनाधोमेखलां मोचयेत् । तुष्णिं दण्डाजिने भूमौ निधापयेत् । ततस्त्रिन्[२] ब्राह्मणान् भोजयित्वा स्व-

Folio No. 127 - यं ब्रह्मचारी भुक्त्वा शिखावर्जश्चसृ[३]लोमनखानिवापयित्वा स्वाहा अहतवस्त्रं यज्ञोपवितं[४] उत्तरीयं य परिधाय गन्धं गृहीत्वा कुण्डलादिनालंकृतालंकाराः । प्र (प्रजापति ऋषिः)। य (यवमध्या छन्दः)। श्रीर्देवता । स्रग्चन्दने विनियोगः । **ॐ श्रीरसि मयिरमस्व** । अनेन स्रजं बध्नीयात् । ततः । प्र (प्रजापति ऋषिः)। य (यवमध्या छन्दः)। उपानहौ देवता । उपानहपरिधापने विनियोगः । नेत्र्यौ स्थौ नयतं माम् । इति परिदद्यात् । प्र (प्रजापति ऋषिः)। य (यवमध्या छन्दः)। दण्डो देवता । दण्डपरिग्रहणे (विनियोगः)। **गन्धर्वोस्युपाव उपमामव** । अ-

Folio No. 128 - नेन वैणवं दण्डं गृह्णीयात् । तत आचार्य समिपं गत्वा । प्र (प्रजापति ऋषिः)। य (यवमध्या छन्दः)। आचार्यो देवता । परिषत्सहिताचार्यविक्षणे विनियोगः । ॐ यक्षमिव चक्षुष प्रियो भूयासम् । अनेन परिषत्सहिताचार्यं वेक्षते । ब्रह्मचारीकर्मदेशस्यनिकटे एव उपविश्य प्रसारिताङ्गुलिर्दक्षिणहस्तेन मुखभवान् प्राणदायुष्मन् समन्तादास्पृशन् । प्र (प्रजापति ऋषिः)। य (यवमध्या छन्दः)। प्राणादयो देवता । प्राणस्पर्शने विनियोगः । **ओष्ठ्याऽपिधानानुकुलीदन्तः**[५] **परिमितः पविः जिह्वे माजिह्वलोवाङ्गरिमाद्देवादयः** ।

---

१ - अ.वे. - ७.८३.३, १८.४.३९

२ - **ततस्त्रीन्** इति स्यात् ।

३ - **यज्ञोपवीतं** इति स्यात् ।

४ - **शाखावर्जश्मसृ** इति स्यात् ।

५ - **ओष्ठ्याऽपिधानानुकूलीदन्तः** इति स्यात् ।

Folio No. 129 - इति जपेत् । ततो ब्रह्मचारी बलीवर्दयुक्तरथसमिपं गत्वा । प्र (प्रजापति ऋषिः)। य (यवमध्या छन्दः)। वनस्पति (देवता)। रथदर्शने (विनियोगः)। वनस्पते विड्वङ्गो हि भूया अस्मत्सखा प्रतरणः लुवीरः । गोभिः सन्नधो असि वीडयस्व । अनेन स्पृश्न् । प्र (प्रजापति ऋषिः)। य (यवमध्या छन्दः)। विष्णु[1] (विष्णुर्देवता)। रथारोहणे विनियोगः । आस्थाता ते जयतु जेत्यानि । अनेन रथमारुह्य उपविशेत् । रथाभावे शकटादिकमारुह्य प्राचीदिशं गत्वा प्रदक्षिणमावृत्त्याचार्यसमिपं गत्वा यथाशक्तिदक्षिमां दद्यात् । आत्रावसरे आचार्यो ब्रह्मचारिणं मधुपर्केणा-

Folio No. 130 - र्हयेत् । विष्टरौ । पाद्यम् । अर्घ्यम् । आचमनीयम् । मधुपर्कम् । गौरित्यासादयेत् । पुण्याहवाचनम् । आगतस्य माणवकस्य षडार्घ्यारम्भः क्रियते यदेत्यादि । आचार्यो विष्टरद्वयमुत्तानहस्ताभ्यामुत्तराग्रमधोमुखं गृहीत्वाऽन्यस्मिन् ब्राह्मणो । विष्टरौ । विष्टरादिति वदति प्रतिगृह्यतां माणवकः । प्रतिगृह्णामीति गृहीत्वा । वशिष्ठ ऋषिः । अनु (अनुष्टुप् छन्दः) । औषधि (देवता) । विष्टरस्यासने विनियोगः । **ॐ या ओषधिः सोमराज्ञी वर्हिशतविचक्षणाः । तामद्यमस्मि-**

Folio No. 131 - न्नासनेऽछिद्राः शर्मयच्छत ।। इति पठित्वासने उत्तराग्रं विष्टरमेकं दत्त्वोपविश्य द्वितीयं गृहीत्वा । वशिष्ठ (ऋषिः)। अनु (अनुष्टुप् छन्दः)। औषधि (देवता)। विष्टरस्य पादयोरधस्तादासने विनियोगः । **ॐ ओषधिः सोमराज्ञवद्द्विशतविचक्षणाः । तामद्यमस्मिनपादयोछिद्राः शर्मयच्छत् ।** इति पठित्वा पादयोरधस्तादुत्तराग्रं निदध्यात् । अथ ताम्रादिपात्रे सलिलं गृहीत्वा । पाद्यं पाद्यं पाद्यं इत्याचार्यः । पाद्यमर्पयति । माणवकः प्रतिगृह्णामीति गृहीत्वा । प्र (प्रजापति ऋषिः)। विराट् छन्दः ।

---

२ - **विष्णुः** इति स्यात् ।

Folio No. 132 - आपो । पाद्यजलविक्षणे विनियोगः । ॐ यतो देवी प्रतिपश्याम्यापस्ततोमाराद्धरागच्छतु । अनेन पाद्यमवेक्षाञ्जलिं गृहीत्वा । प्र (प्रजापति ऋषिः)। विराड्मयः[1] (विराट् छन्दः)। श्रीर्देवता । सव्यपादप्रक्षालने विनियोगः । **ॐ सव्यपादमवनेनिजेऽस्मिनाष्ट्रौ श्रियं दधे ।** अनेन वामपादेऽञ्जलिं दद्यात् । पुनरुदकाञ्जलिं गृहीत्वा । प्र (प्रजापति ऋषिः)। विराड्म[2] (विराट् छन्दः)। श्री[3] (श्रीर्देवता)। दक्षिणपादप्रक्षालने (विनियोगः)। **ॐ दक्षिणपाद-मवनेनिजेऽस्मिन्राष्ट्रे श्रियमावेशयामि ।** अनेन दक्षिणपादं प्रक्षालयेत् ।

Folio No. 133 - पुनरुदकं गृहीत्वा । प्र (प्रजापति ऋषिः)। य (यवमध्या छन्दः)। श्री[4] (श्रीर्देवता)। उभयपादप्रक्षालने (विनियोगः)। **ॐ पूर्वमन्वपर-मन्वमपरमन्वमुभौ पादाववनेनिजेराष्ट्रस्यरद्ध्वा अभिस्यावरुद्धै ।** इत्युभयपादं प्रक्षालयेत् । आचार्यम् । अर्घ्यमर्घ्यमर्घ्यम् । प्रतिगृह्यतामिति वदति । प्रतिगृह्णामीति ब्रह्मचारी गृहीत्वा । प्र (प्रजापति ऋषिः)। य (यवमध्या छन्दः)। अर्घ्यदेवता । अर्घ्यग्रहणे विनियोगः । **ॐ अन्नस्यराष्ट्रिरसिराष्ट्रस्ते भूयासम् ।** अनेनार्घ्यजलं शिरसि गृह्णीयात् । आचमनीयमाचमनीयमाचमनीयम् । प्रतिगृह्यतामीति आचार्यो वदति ।

Folio No. 134 - प्रतिगृह्णामीति ब्रह्मचारी गृहीत्वा । प्र (प्रजापति ऋषिः)। य (यवमध्या छन्दः)। आचमनीयो देवता । आचमनीयमाचमने विनियोगः । **ॐ यशोसियशो मयि धेही ।** अनेनोत्तराभिमुखो भूत्वा द्विराचामेत् । ततः कांस्यपात्रे घृतमधुयुक्तं दधि निधाय पात्रान्तेणापिहितम् । मधुपर्को मधुपर्को मधुपर्कः । प्रतिगृह्यतामीति आचार्यः समर्पयति । ब्रह्मचारी प्रतिगृह्णामीति गृहीत्वा । प्र (प्रजापति ऋषिः)। य (यवमध्या छन्दः)। मधुपर्को (देवता)। मधुपर्कग्रहणे विनियोगः । **ॐ यशसो यशोसि ।** अनेन मधुपर्कं गृहीत्वो-

---

१ - **विराद्** इति स्यात् ।
२ - **विराद्** इति स्यात् ।
३ - **श्रीः** इति स्यात् ।
४ - **श्रीः** इति स्यात् ।

Folio No. 135 - पविशेत् । प्र (प्रजापति ऋषिः)। य (यवमध्या छन्दः)। मधु (मधुपर्को देवता)। मधुपर्कप्राशने (विनियोगः)। **ॐ यशसोर्भक्षसीत्यनेनाऽङ्गुष्ठकनिष्ठाभ्यां गृहीत्वा प्राण । ॐ महसोर्भक्षोसी-त्यनेनानामिकाङ्गुष्ठाभ्यां गृहीत्वा प्राण । ॐ श्रीर्भक्षोसि श्रियं मयि धेहीति मध्यमाङ्गुष्ठाभ्यां गृहीत्वा प्राण ।** तुष्णिं प्रदेशिन्यङ्गुष्ठाभ्यां भयिष्ठं[१] भक्षयित्वा शेषमुच्छिष्टमादाय ब्राह्णाय दद्यात् । ब्रह्मचारिणाचमने कृते गौरिति त्रिर्गोसमिपस्थ्येनापितो[२] बृयात्[३] । ब्रह्मचारी । प्र (प्रजापति ऋषिः)। बृहती (बृहती छन्दः)। गौ[४] (गौर्देवता)। पूर्वबद्धगोक्षणे[५] विनियोगः ।

Folio No. 136 - मुञ्च गां वरुणपाशादितिमेयिधेहि । तं जहि अमुकदेवशर्मणश्चोभयरुत्सृज गामभूतृणानि पिवतु उदकम् ।। इति पठेत् । गवानुगच्छन्तं तामनुमन्त्रयेत् । प्र (प्रजापति ऋषिः)। अनु (अनुष्ठुप् छन्दः)। गौ[६] (गौर्देवता)। गवानुमन्त्रणे विनियोगः । **माता रूद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः । प्र नु वोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट ।।**[७] इति गामभिमुखः कृताञ्जलिर्जपेत् । ततः प्राणान् संस्पृशेत् । ब्रह्माग्निविसर्जनम् । शान्तिकरणम् । ब्राह्मणभोजनम् ।

Folio No. 137 - विष्णुस्मरणपूर्वकमछिद्रावधारणम्[८] । मम पुत्रस्यामुकदेवशर्माणः समावर्त्तनकर्म यत्कृतं तत्सुकृतमस्तु । एतत्कर्म निमित्तमित्यादि । वामदेवं गीत्वा ब्राह्मणैराशीर्वादं कुर्युः । इति नृसिंहमिश्रकृतविवाहादिसमावर्त्तनान्तकर्मपद्धति समाप्तः[९]।

---

१ - **भूयिष्ठं** इति स्यात् ।

२ - **त्रिर्गोसमीपस्थ्येन** इति स्यात् ।

३ **ब्रूयात्** इति स्यात् ।

४ - **गौः** इति स्यात् ।

५ - **पूर्वबद्धगोवीक्षणे** इति स्यात् ।

६ - **गौः** इति स्यात् ।

७ - ऋ.वे. - ८.१०१.५, तै.आ. - ६.१२.१

८ - **विष्णुस्मरणपूर्वकमच्छिद्रावधारणं** इति स्यात् ।

१ - **समाप्ता** इति स्यात् ।

Dr. Dillip Kumar Kar, S/o Sri Fakir Kar and Smt. Suvarna Devi, has born at Badagorada of Nayagarh district of Orissa state in 1970. He passed ***Ācārya*** *(M.A.) in 1993 and* ***Viśiṣṭācārya*** *(M.Phil.) in 1994 in Advaita Vedānta Philosophy from Sri Jagannātha Sanskrit Viśvavidyālaya, Sri Vihār, Puri, Orissa with 1st division. Then he received the Vidyāvāridhi (Ph.D.) award on the Technical Term Analysis of Advaita Vedānta Philosophy from Rāshtriya Sanskrit Sansthān, New Delhi through Sri Sadāśiva Kendrīya Vidyāpītha, Puri, Orissa.*

Dr. Kar is presently working as a Junior Research Assistant in the Academy of Sanskrit Research, Melkote, Mandya District of Karnataka state since 1999. During this servise period he worked on several Sanskrit-based Science Research Projects such as "Iron and Steel in Ancient India", "Metallurgy in Ancient India", "Indian Chemistry" and on several Computational Sanskrit Projects under the supervision of Prof. M.A. Lakshmithathachar, the active Director of the Academy. He also presented many papers in many National and International Seminars and Conferences and contributed many articles, Sanskrit poems in many National and International Journals.

The Works of the Author

Sanskrit-based Science works

1) *"The Concept of Rasaśālā or the Ancient Indian Pharmaceutical Work-shop",*
2) *"A Base-book for Research on Indian Sciences"*
3) *"Saṅgaṇakīyaṃ Saṃskṛtaṃ"*

Palm-leaf editing work

4) *"Sāmavedīyakarmavidhānaṃ(Samāvartanāntam)" of Sri Nṛsiṃha Mishra.*

Sanskrit works

5) *"Vedopaniṣatsu Prajāpatisvarūpavimarśaḥ"*
6) *"Advaitavedānte Pāribhāṣikaśabdavimarśaḥ"*